M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. ______
Ser. 221

Title: Bhavi Prayaschitta

221

Bhāvi Prayaschitta	: Title
: :	: Author
: :	: Editor
: :	: Year, Vols.
: :	: Publisher
221 : :	: Remarks

॥भाविप्रायश्चित्त॥

॥श्रीगणपतयेनमः॥ ॥विध्यपराधेप्रायश्चित्तिः॥विधिशब्देनविहितमुच्यते।विहितस्या
करणेऽन्यथाकरणेचप्रायश्चित्तिःकर्तव्या॥प्रायोविनाशः।चित्तिःसंधानं।विनष्टसंधानंप्रा
यश्चित्तिरित्युक्तंभवति॥तथाचविध्यपराधेसतितदर्थेयदिविशेषतोविहितमस्तितदेवक
र्तव्यं॥नास्तिचेद्व्याहृतिहोमःकर्तव्यः॥एतदेवसर्वप्रायश्चित्तमुच्यते॥एवंचसतियथाकथं
चित्विधिसंपादनेप्रायश्चित्ताभावउक्तोभवति॥प्रायश्चित्तकालस्तुनिमित्तानंतरमेवेत्युत्स
र्गः॥ऐष्टिकेतंत्रेप्राधानिकस्विष्टकृत्सुसमिष्टयजुर्होमाद्वाप्रागितिबौधायनः॥विहितस्यद्रव्य
स्यस्वरूपतोऽभावेप्रतिनिधिःस्वीकार्यः॥क्वचित्स्वरूपसत्तायामपिप्रकृतकार्याशक्तौप्रतिनि
धिरेवस्वीकार्यः॥तथाचार्थद्रव्ययोर्विरोधेऽर्थोबलीयानितिसूचितंभवति॥इदंचापरं॥सा १

मर्थ्येसतिगुणसंपादनार्थेनप्रतिनिधिरुपादातव्यः॥द्रव्यगुणविरोधेद्रव्यंबलवत्॥एत
दुक्तंभवतियत्कार्यार्थंतथायद्विहितंतस्यतत्कार्याशक्तौतत्प्रतिनिधिरूपंतत्कार्यकरणाय
स्वीकर्तव्यं॥तथाचप्रतिनिधिप्रयोगेऽपिविहितस्वरूपापचाराद्विध्यपराधशंकयाप्रायश्चि
त्तंनकर्तव्यं॥तत्रमुख्यएवविध्यर्थःफलितोभवतीति॥तथाविनष्टसंधानंद्विविधं॥प्रत्यक्षम
तींद्रियंच॥तत्राद्यंयथायतनादपगतस्यवह्नेःपुनःस्थापनं॥स्कंनस्यवाहविषोग्रहणायो
ग्यस्यपुनर्ग्रहणं॥द्वितीयंतुहोमजपादिभिः॥यच्चातींद्रियेसंधानंहोमादिनविहितंतत्र
भूर्भुवःस्वःस्वाहेतिसर्वप्रायश्चित्तमवश्यंकर्तव्यमितिहारिकाद्युक्तोयंनयः॥अथापस्तंबो
क्तं॥कृतिलक्षणंप्रायश्चित्तंविध्यपराधेविधीयतइति॥अत्रप्रायश्चित्तनिमित्तेश्रूयमाणेलिं

गसंख्यादिकमविवक्षितं॥ यथा पुरोडाशः क्षायेनेत्यत्रैकत्वं यद्दृष्णपदीत्यत्र संख्या॥ तेन
पुरोडाशयोर्बहूनां दाहे प्रायश्चित्तप्राप्तिः॥ तथा द्वादशापद्यां षोडशापद्यां वा प्रायश्चित्तं॥ त
थाच विध्यपराधे कर्मान्यथाकरणे क्रतुक्तं प्रायश्चित्तं विधीयते॥ यथांतरागमनादौ यो यत्र च
विधिरस्ति यथा वाजपेये रथस्यांतरागमनं न तत्र प्रायश्चित्तप्रसक्तिरिति॥ यथा वा यागार्थं प्र
याणे न वास्तोष्पतिहोमो विध्यपराधाभावात्॥ यत्रैकस्मिन्निमित्ते श्रौतस्मार्तयोः प्राप्तिः त
त्र श्रौतमेव विधीयत इति॥ यथा॥ ब्रह्मौदनाग्निनाशे पुनः पाकवरदानं तं नायाश्चेति॥ त
थैकस्मिन्निमित्ते विहितानि कश्चित्समुच्चीयंते यथा स्कंदनेऽभिमंत्रणाद्भिः सिंचनं होमोऽ
नशनं च॥ तथा दर्शपूर्णमासातिपत्तौ पाथिकृती वैश्वानरी च॥ कश्चित्सामान्यस्य विशेषेण बा २

धः॥ यथाऽऽहवनीयानुगमने मंथनादिप्रायश्चित्तस्याज्याहितप्रायश्चित्तेन बाधः॥ तथा यद
वादृष्टार्थं होमजपादि न विहितं तत्र दृष्टार्थं संपाद्यानाम्नातत्र्यजपः सर्वप्रायश्चित्तं चा
दृष्टार्थं कर्तव्यं॥ अदृष्टार्थानां वचनात्समुच्चयो न्यथा विकल्पः॥ दृष्टार्थानां तु विकल्प एव॥
प्रायश्चित्तकालस्तु निमित्तानंतरमेव मुख्यः॥ न पर्वाद्यपेक्षा॥ यथा गृहदाहनिमित्ता क्षाम
वति॥ यथा वा पुनराधानं न तत्र वसंताद्यपेक्षा॥ कश्चिज्ज्ञाते ष्ट्यादौ न्यायप्राप्तपर्वापेक्षापि
॥ यत्र तंत्रदक्षिणादिभेदस्तत्र प्रकृतां समाप्यैव वैकृतीमिष्टिं कुर्यात्॥ तथांगलोपे प्रधा
नयागात्पूर्वं स्मरणे प्रायश्चित्तमंगकरणं च॥ प्रधानयागोत्तरं प्रायश्चित्तमेव नांगावृत्तिः॥ एवंशे
षणादावपि॥ तथा व्यत्यासे मंत्रलोपादावपि॥ तथा होमयागादीनां गौणकालातिक्रमे प्राय

श्चित्तमेव न प्रधानाहुतिः॥ क्वचिदंगलोपेपि सांगस्य प्रधानस्याहुतिः॥ यथान्यां दुग्ध्वा पुन
र्होतव्यमिति॥ यथा वा एकस्मिन्हविषि भिन्ने सांगस्य तस्याहुतिः॥ क्वचित्तंत्रमध्य एव नष्टं
हविरुत्पाद्य तेनैव तंत्रेण समापनं॥ एवं पशुचातुर्मास्यसोमादिषु यथायथमूहनीयं॥ त
त्र प्रायश्चित्ते आपस्तंबबौधायनोक्ता विशेषाः॥ पात्रानुक्तौ तु स्रुवः॥ वचनात्तु गृहीतमन्य
त्रैकगृहीतं॥ वह्निविशेषानुक्तावाहवनीये होमः॥ कर्तृविशेषानुक्तावध्वर्युः॥ आश्वला
यनानां जपानुमंत्रणहोमादौ विशेषानुक्तौ ब्रह्मैव कर्ता॥ दाने यजमान एव दद्यात् संनिधाने
ऽसंनिधाने पत्नी॥ एवं त्यागे॥ कर्ममध्यपतितानि प्रायश्चित्तानि संस्कृताज्येन कर्तव्यानि॥ तद
भावे स्मार्तवदाज्यसंस्कारः॥ स्रुक्स्रुवसंमार्गश्च॥ परिस्तरणपरिसमूहने तंत्रानं तः पाति २

प्रायश्चित्ते कर्तव्यानीति केचित्॥ तथा च सामान्यतो विशेषानुपदेशे ऋग्वेदविहिते कर्मणि भ्रे
षे भूः स्वाहेति ब्रह्मा गार्हपत्ये स्रुवाहुतिं जुहुयात्॥ यजुर्वेदविहितकर्मभ्रेषे भुवः इति दक्षि
णाग्नौ स एव जुहुयात्॥ सोमे यजुर्भ्रेषे आग्नीध्रीये भुवः स्वाहेति जुहुयात्॥ सामभ्रेषे स्वः स्वा
हेति आहवनीये॥ सर्वतो विज्ञाते वा भूर्भुवः स्वाहेति ब्रह्माहवनीये जुहुयात्॥ तथा आश्व
लायनानामापस्तंबानां च यज्ञयज्ञे विशिष्टाने पूर्णाहुतिरुक्ता सा चाश्वलायनस्येतूक्तमिति प्रकर
णे॥ तस्या अनुष्ठानमेवं॥ स्मार्तवदाज्यं संस्कृत्य स्रुक्स्रुवौ संमृज्याहवनीयं प्रणीय परिस्तीर्य
परिसमुह्य दक्षिणतो ब्रह्मयजमानावुपवेश्याध्वर्युर्द्वादशगृहीतेनाष्टगृहीतेन चतुर्गृही
तेन वाज्येनांतर्वेदि तिष्ठन्दक्षिणतो वा चतुर्थ्यंतां देवतां संकीर्त्य स्वाहाकारेण जुहुयादि

त्ति॥ पुरोनुवाक्यामनूच्य याज्यया जुहुयादिति केचित्॥ केशवीकारोक्त्यास्तु पूर्णेनाज्येनाहुतिः
पूर्णाहुतिरित्यप्यनुग्रहः॥ तथा सर्वत्र कर्मसमाप्तौ सत्यामज्ञातत्रयं इदं विष्णु॰ त्वंनोअग्ने॰
सत्वंनोअग्ने॰ भूर्भुवःस्वरिति जपश्चावश्यकः कर्तुः॥ यजमानस्य त्वमग्ने व्रतपा॰ यज्ञोवयं
॰ विष्णुस्मरणं॰ ब्रह्मार्पणकरणं चावश्यकमिति संक्षेपः॥ यथा यज्ञोपवीतिना बद्धशिखेन
पवित्रपाणिना बद्धकच्छेनाचांतेन स्नातेन शुचिना प्रारब्धेप्यनंतर्जानुहस्तेन विहितं क
र्मकर्तव्यमित्यादिस्मृत्युक्तस्यान्यथाकरणे प्रयोगांतःपातित्वात्सर्वप्रायश्चित्तं विष्णुस्मरणा
दि च कर्तव्यं॥ तथाहि द्विविधमंगजातं॥ आरादुपकारकं सन्निपत्योपकारकं च॥ तत्रारादुपकार
कस्यांगस्य लोपे कर्मसमाप्तेः प्राक् प्रायश्चित्तं विधाय तत्तदंगं कुर्यात्॥ कर्मसमाप्तौ प्रायश्चि- ४

त्तमेव नाहुतिः॥ सन्निपत्योपकारकस्य द्रव्यसंस्काररूपस्य लोपे प्रधाननिष्पत्तेः प्राक् सर्वस्या
पि करणं॥ प्रधानयागोत्तरं प्रायश्चित्तमेव नाहुतिः॥ एवमकाले कृतस्य क्रमानुग्रहार्थं पुनरा
हुतिर्न भवति॥ परिस्तरणप्रस्तरबर्हिः परिधिविधृतीध्मोपवेषादीनां संभारणां च नाशे
विनष्टे वाद्युपहते वा तत्प्रतिरूपमन्यं मंत्रेणाहृत्य निधाय प्रोक्षणादिना संस्कृत्य नियोजयेत्स
र्वप्रायश्चित्तं च॥ औषधद्रव्येषु प्राक्पेषणान्मलाद्युपहतौ प्रक्षालनेन शुद्धिः॥ एवं सोमेभि
षवात्प्राक् क्षालनादिना शुद्धिः॥ एवं पिष्टदधिपयआज्यादिषु यथायोग्यं त्यागस्वीकारौ ज्ञेयौ॥ अ-
थ सर्वत्र द्रव्यानुकल्पाः॥ ॥ व्रीहियवौ मुख्यौ॥ तयोरभावे प्रियंगवः॥ तदभावे श्यामकनीवारौ॥
तदभावे वेणुयवाः॥ तदभावे भोजनयोग्यमनिषिद्धं द्रव्यं॥ गव्यमाज्यं मुख्यं॥ तदभावे माहिषं॥

तदभावे आज्यं ॥ तदभावे आविकं ॥ तदभावे तैलं ॥ तदभावे जर्तिलस्नेहः ॥ तदभावे कौसुंभ
सार्षपौ ॥ तदभावे मधूकबीजनारिकेलस्नेहौ ॥ तदभावे पिष्टंजले नालोऽप्याज्यकार्ये नियोज
येत् ॥ बर्हिःकार्ये दर्भाः प्रथमं ॥ तदभावे काशाः शराः आश्ववालस्फगंधितेजनद्वर्वा यवश्या
माकतृणेक्षुदलानि वाश्वर्वोऽलाभे यावाणि ॥ इध्मकार्ये पालाशखादिरौ मुख्यौ ॥ तदभा
वे अश्वत्थोदुंबरशम्यर्कापामार्गादयः ॥ अथवा कपित्थनिंबतालशाल्मलिकोविदारश्लेष्मात
कविभीतकराजवृक्षकरंजलिंपाकादि वर्जयित्वा सर्वान् वनस्पतीनिध्मार्थे योजयेत् ॥ गो
पयो मुख्यं ॥ तदभावे माहिषमाजमाविकं दधिवादिष्विति निश्चितं जलं वा प्रतिनिधिः ॥ एवं दधो
धि ॥ एवं सोमाभावे इतिकान्नफाल्गुनान्यन्यावायवाधौषधयः ॥ एवं पात्रेष्वकेकाष्ठधभा ५

वेष्वर्कोक्तकपित्थादीन्वर्जयित्वाहृत्समाचं याद्यं ॥ दक्षिणासु गौर्मुख्या ॥ तदभावे तन्मूल्यं हिर
ण्या ॥ एवं वरादिषु ॥ एवमुक्तदक्षिणासु मुख्याभावे मूल्याध्यायोक्तं द्रव्यं शक्त्या देयं ॥ अथा
रणीनाशे प्रायश्चित्तं ॥ तत्र समारूढारण्योः स्वरूपनाशेऽरण्यंतरमाधानविधयानीय पुनरा
धानं कर्तव्यं ॥ अथारणी स्वरूपे विद्यमानेऽसमारूढे मंथनासामर्थ्ये समारूढमग्निमुपावरो
हेति मंत्रेण लौकिकाग्नावुपावरोह्य तस्मिन् जीर्णारणीं प्रक्षिप्य तस्मिन्नग्नौ नवे अरण्या
अरण्योर्निहितो जातवेदा गर्भ इव सुधितो गर्भिणीषु ॥ दिवे दिव ईड्यो जागृवद्भिर्हविष्म
द्भिर्मनुष्येभिरग्निः इति मंत्रेणोपावरोह्य मथित्वा उपावरोहेति निवर्तमानजपं जपित्वा
यतने निदध्यात् ॥ इदमेव पुनराधानमित्याहुः ॥ उत्तरारणिमात्रस्य नाशेऽधरारणिद्वैधा

कृत्वा मंथनादिकार्यं ॥ असमारूढेऽरणीनाशे शकौ वा पर्वारणीनाशकलीकृत्य तस्मिन्नग्नौ ष
हृत्यतिहरणे प्रविशायोनिमित्तां देवयज्यायै त्वावोन्वेजातवेदः ॥ ॥ अरण्योररण्योरनुसं
क्रमस्व जीर्णां तनुं जीर्णयानिर्णुदस्वेति मंत्रेण नवेऽरणी समारोप्य मंथनादि कुर्यात् ॥
अत्रानुगतेऽग्नौ पुनराधानमेव ॥ असमारूढारण्योरशुचिस्पर्शे यथायोग्यशुद्धिः ॥ समारूढे
तु त्यागएवामेध्यवस्तुभिरत्यंतोपहतौ ॥ अमेध्यवस्तूनि । वसाशुक्रमसृङ्मज्जामूत्रं
विट्कर्णविट्नखाः श्लेष्माश्रुदूषिकास्वेदो द्वादशैते नृणां मलाः ॥ अमेध्यदेशास्तु ॥ यत्र
प्रसूयते नारी म्रियते दह्यते शिवा ॥ चांडालाद्युषितं यच्च यत्र विष्णादिसंगतिः ॥ बीभत्सैः
कल्मषैर्युक्ताश्चामेध्याः प्रकीर्तिताः ॥ आहवनीयमंथनविषयः ॥ अन्वाधानार्थप्रणीतेऽन्वा ६

योनिगार्हपत्योत्पत्त्यर्थः ३

हितेऽनुगते दशहोतृं चतुर्होतृ पंचहोतृ समारस्वतहोम संभारयजुः सावित्र्यादिहोम उद्वसा
नीयापूर्णाहुत्यर्थे शावली होमार्थं च प्रणीते प्राग्घोमादनुगते च लौकिकारणीभ्यां मंथ्य इति
केशवीकारः ॥ अथवा योनितउत्पत्तिः सर्वप्रायश्चित्तं चेति ॥ ॥ इति श्री सकलप्रायश्चित्तोप
योगिपरिभाषाप्रकरणं ॥ ॥ अथाधानेऽग्न्यनुगमनप्रायश्चित्तं ॥ तत्र ब्रह्मौदनिकाग्निः श्रा
कृपाकात्रश्यति तदा आश्वलायनस्य सर्वाधाने पुनः श्रोत्रियागाराद्वा हृत्या याश्राग्नेरित्येत
याकृत्वा भूर्भुवः स्वरिति चकृत्वा ब्रह्मौदनादि कार्यं ॥ आपस्तंबस्यानुगते मंथ्यः श्रोत्रियागा
राद्वाहार्य इत्यादिग्रंथोक्तेः अभ्युत्पत्ति प्रायश्चित्ते भवतः ॥ तत्र प्रयोगः ॥ योनितोग्निमुत्पाद्य प
रिस्तीर्य परिषिच्योत्तरेणाग्निं दर्भेषु हवींषि आज्यस्थालीं प्रोक्षणीं स्रुवं चेति प्रयुज्य पवित्रे कृत्वा

भा॰प्रा॰
७

प्रोक्षणीः संस्कृत्य प्रोक्षणाज्यसंस्कारस्रुवसंमार्जनांतं कृत्वाऽयाश्चेति जुहोति॥ सर्वप्रायश्चित्तं कृ
त्वा ब्रह्मौदनादिकार्यं॥ असर्वाधाने पुनरेकदेशमात्रस्य सर्वप्रायश्चित्तं कृत्वा ब्रह्मौदनादिका
र्यं॥ निर्मथ्येष्वेवं॥ प्रायश्चित्ताधानेप्ययमेव प्रकारो श्रुत्यंत्रौ॥ ब्रह्मौदनपाकादूर्ध्वमरणिनिष्ट
पनात्पूर्वमनुगमने पूर्ववदग्निमुत्पाद्य पुनर्ब्रह्मौदनादि समानवरदानांतं कुर्यात्॥ मंथ
नानंतरं जातस्याग्नेर्निवर्त्तमानजपात्पूर्वमनुगमने स्फुलिंगन्यायेन तदनाहृत्य पुनर्मंथनं
॥ न तत्र प्रायश्चित्तं॥ जाते निवर्त्तमानजपे संभारेषु निधानात्प्रागनुगमने तं प्रयोगं परित्यज्य
कालांतरे आदधीत नात्र प्रायश्चित्तानुपदेशात्॥ केचित्तु अनाज्ञातं॰ पुरुषसंमितः॥ यत्पा
कत्रेति सकृत्त्रयं जपित्वा पुनर्मंथनं कार्यं॥ तदत्र प्रयोगस्य त्यागे प्रमाणाभावादित्याहुः॥ ७

अपरदक्षिणाग्नेरुद्धरणानंतरं मंथनोत्तरं वाहरणानंतरं वा संभारेषु निधानात्प्रागनुगमने
अनाज्ञातत्रयं जपित्वा पुनः स्वयोनितउत्पाद्य संभारेषु निदध्यात्॥ आहवनीयस्यानुगम
ने भुवः स्वाहेति दक्षिणाग्नौ कृत्वा पुनरुद्धृत्यायतने निदध्यात्॥ दक्षिणाग्निस्थापनात्पूर्व
मुद्धृतस्याहवनीयस्यानुगमने अनाज्ञातत्रयं जपित्वा पुनरुद्धरणादिकार्यं॥ एवं सभ्याव
सथ्ययोरनुगमने सर्वप्रायश्चित्तं कृत्वा योनितउत्पाद्य निधानं॥ आधानोत्तरं मिश्रुन्वाधाना
त्पूर्वं गार्हपत्यस्याहवनीयस्य वानुगमने तत्तदवक्षाणेभ्यो मंथनं॥ अवक्षाणानि तु दग्ध
काष्ठानि॥ अवक्षाणाभावे नित्यारणी गार्हपत्यभस्मना संस्पृश्य मंथयेत्॥ एवमाहवनीयं
लौकिकारणी तो मथित्वायतने निधाय मित्रोदयोहोतव्याः॥ ताश्चाथेवक्तव्याः॥ नात्र तपस्वती

ष्टिः॥आधानेष्टेः प्रागिष्ट्यन्तरप्रवृत्त्यनुपपत्तेः॥एवं दक्षिणाग्निसभ्यावसथ्यानामनुगमनेऽप्य
योनिनष्टत्वात्तिः सर्वप्रायश्चित्तं च॥सेष्टिकाधानस्याहवनीयसंपादकत्वेनेतिपक्षे इष्टिमध्ये
ग्नीनामनुगमनेऽप्ययोनिनष्टत्वात्तिः॥सर्वप्रायश्चित्तं च॥सेष्टिकाधानस्याहवनीयसंपादक
त्वेतिपक्षे इष्टिमध्येऽग्नीनामनुगमने प्रयोगोपसर्गे न प्रायश्चित्तमिति केचिदाहुः॥नकस्यका
रणानुमतं॥केचित्तु इष्ट्यन्तमाधानपक्षे आधानस्यासमाप्तेः पुनर्योनिनष्टत्वात्तैस्तैराधान
मंत्रैरायतने निधाय मित्रादिहोमः इत्याहुः॥आधानोत्तरमिष्ट्यर्थमन्वाधाने कृतेऽप्यनुगमने
न्वाहितप्रायश्चित्तं सर्वेषां माकर्मसमाप्तेः॥केचित्तु सभ्यावसथ्ययोर्नान्वाहितप्रायश्चित्तं किं तु
योनिनष्टत्वात् सर्वप्रायश्चित्तमित्याहुः॥अत्राजस्रस्याहवनीयस्य प्रणयनमेवाविशेषोपदे ८

शात्॥केचित्तु अजस्रस्याहवनीयस्य गार्हपत्यानुप्रवेशाद्धेतौ किं कारणीतो मथित्वायतने निधाया
न्वाहितप्रायश्चित्तमित्याहुः॥एवं दक्षिणाग्नेरपि॥प्रथमेष्टौ समाप्तायामुत्तरेष्ट्यन्वाधानात्पू
र्वमनुगमने नान्वाहितप्रायश्चित्तं॥अन्वाधानसंस्कारस्यानुवृत्तत्वात्॥अन्यथा पुनरन्वाधानो
पदेशोऽनर्थकः स्यात्॥किं तु योनिनष्टत्वाद्यमित्रादिहोमः सर्वप्रायश्चित्तं च॥पूर्णाहुतेः प्राक्य
स्य कस्यचिदंगस्य लोपे पूर्णाहुतिं कृत्वा भुव इति दक्षिणाग्नौ जुहुयात्॥अत्र सर्वत्रानुक्ता आहव
नीय एव होमः॥व्याहृतायां स्रुवेणादि॥तत्र मंत्र जयो वेति केचित्॥अनुगते होम इत्यपरे॥अ
थाप्यनुत्पन्नत्वात्सूर्योदयात्प्राक्गार्हपत्याधानासंभवे तं प्रयोगं परित्यज्य कालांतर आदधीत
॥केचित्तु कालस्यांगत्वात्तल्लोपे नानात्वयं सर्वप्रायश्चित्तं कृत्वा गार्हपत्याधानं कर्तव्यमिति॥

तच्च प्रायश्चित्तं शिवाजपांते गार्हपत्ये कर्त्तव्यं॥ आहवनीयाधाने यदि मेघादिना सूर्यं न पश्येत्॥
तदा उद्वयं तमसस्परि॥ उदु त्यं जातवेदसं॰ चित्रं देवानामित्याहुतित्रयं सर्वप्रायश्चित्तं चाह
वनीये जुहुयात्॥ एवमाधाने संकल्पानंतरमाग्नेयस्य दक्षिणाकालात्पूर्वं पत्नी रजस्वला चेत्
प्रयोगमुत्सृज्य कालांतर आदधीत॥ दक्षिणादानादूर्ध्वं चेत्तामवरुध्य समापनीयं॥ एवमाधाने प्रा
रब्धे नोभयमप्याशौचमिति केशवः॥ गार्हपत्याधाने जाते रजस्वला चेत्तामपरुध्य समापनीयं॥
ततः पूर्वं चेत्प्रयोगोत्सर्ग इति नारायणीकारः॥ अर्वाक्पूर्णप्रदानाच्चेदाधाने स्त्री रजस्वला॥ तदु
दौ पुनराधानं मासात्प्रजननपूर्वकमिति स्मरणात्॥ एवमाधाने यद्दैहिकं प्रायश्चित्तं तत्सर्वं पूर्णाहु
त्या कर्त्तव्यं॥ अनारब्धदर्शपूर्णमासत्वात्॥ एवं देवतायाज्यानुवाक्याहविर्विपर्यासे यद्दोदेवाः ९

ति जुहुयात्॥ अपेक्षा॥ यथावदानातिरेके न्यूने वा यदस्मिन्यज्ञे तरगाम॰ यदस्य कर्मणोऽत्यरी
रिचमिति द्वाभ्यां जुहुयादपेक्षा॥ एवमनादिष्टेऽनाज्ञातत्रयं सर्वप्रायश्चित्तं च जुहुयात्॥ अ
पेक्षा॥ सर्वत्रयस्य स्मृत्येति विस्मृतस्मरणं च॥ ॥ इत्याधानप्रकरणं॥ ॥ अथाग्निहोत्रे अग्न्य
नुगमने प्रायश्चित्तं॥ प्रयाणादर्थसमारूढो गृहे वा प्रणयनकाले गार्हपत्योऽनुगतो मथ्यमानो
यदि विहरणकाले न जायेत तदा लौकिकाग्निमानीय प्रागेवास्तमयादुदयाद्वा प्रसक्तवद्विहृ
त्य होमः कर्त्तव्यः॥ समाप्ते होमे तं परित्यज्य पुनर्मथयेत्॥ उत्पन्ने मित्रादिहोमः॥ तत्राप्याहि
तायहोमकालात्प्राक् न जायते तदा पुनराधानं॥ तृतीयहोमकालात्प्राग्जाते पुनराधानमि
ति केचित्॥ मंथने प्रहृते तु अस्तमयादुदयाद्वा प्रागेव प्रतिनिधिस्थापनं यदा न स्यात्तदा गार्हपत्या

नुगमनेनोभयानुगमस्यजातत्वात्पुनराधानं॥ पश्चाद्दिसनर्हिंगनइतिश्रुतेरुभयानुगतिरित्या
पस्तंबः॥ प्रयाणेसमारूढोयदिनजायतेतथाग्निहोमकालेलौकिकमानीयहोमः कर्तव्यः॥ नाग्ना
नुगतप्रायश्चित्तं॥ ॥अत्रप्रतिनिधेरस्थापनेउदयास्तमयौचेत्पुनराधानं॥ अनुद्धृतेषुगार्हप
त्यानुगमनेउदयास्तमयौचेत्तत्पुनराधानं॥ सर्वानुगमाभावात्नप्रतिनिधिर्मंथनमेवानुद्धर
णप्रायश्चित्तयोः समुच्चयोहोमकालमतिक्रम्याग्नौजातेकालातिपत्तिप्रायश्चित्तमपीतिहत्रितत्
अजस्रपक्षेयोनुगतस्तस्यस्थानेन्यमानीयहोमंकृत्वामथित्वाग्निहोत्रादिहोमः॥ अजस्रपक्षेगार्हप
त्यातिरिक्तानामागामिहोमकालेनाहजननेगार्हपत्यादाहवनीयंप्रणीयाग्निहोत्रादिहोमः॥ इतरेषां
त्वस्वयोनितउत्पत्तिः सर्वप्रायश्चित्तंच॥ गार्हपत्यानुत्पत्तावाधानमेवेति॥ आश्वलायनानांगार्ह १०

पत्येनुगतेभस्मनारणीसंस्पृश्य इतोजज्ञेप्रथममेभ्योयोनिभ्योअधिजातवेदाः॥ सगायत्र्यात्रिष्टुभा
जगत्यानुष्टुभाचदेवेभ्योहव्यंवहन्नः प्रजानन्निति मथित्वाप्रकृतिवत्प्रणीयाग्नेतपस्वतेजनद्वते
पावकवतेष्टाकपालंनिर्वपेत्॥ तत्स्थानेपूर्णाहुतिंवाविधायततोहोमः॥ एवंदक्षिणाग्न्यनुग
मनेपियोनितस्तत्स्थिंप्रणीयतपस्वतीष्टिः॥ विशेषानुपदेशात्॥ अथप्रणयनानंतरमाहवनी
येविद्यमानेगार्हपत्योनुगच्छेत्तचेत्तदाश्वलायनस्यअवक्षाणेभ्योमथित्वाहवनीयमनुगमय्यता
पुनर्विहरणं॥ क्षामाभावेभस्मनारणीसंस्पृश्यमंथयेत्॥ इतोजज्ञइत्यनेनमंत्रेण॥ अरणीमंथने
दिआहवनीयानुगमनंकार्यं॥ एकयोनिर्दक्षिणाग्निश्चेत्तदातस्याप्यनुगमनंकार्यं॥ तूष्णींवाप्रणी
याहवनीयमुपतिष्ठेत॥ अग्नेसम्राळिषेरायेरमस्वसहसेद्युम्नायोर्जेपत्याय॥ सम्राळसिस्वराळ

भा॰प्रा॰

११ भिमारस्वतीत्यौ श्रौ श्रावतामन्नादं त्वाग्नपत्यायादध इति ॥ ततस्तपस्वतीभिः ॥ ततो होमः ॥ अयं
च सूत्रकारसंमतोर्थः ॥ अत्र ब्राह्मणे पंच पक्षा उक्ताः ॥ विद्यमानमाहवनीयं गार्हपत्यं कृत्वा ततः
पूर्ववत्प्रणयेदित्येकः ॥ पूर्वसिद्धादाहवनीयादेकदेशं गार्हपत्यार्थं प्रत्यंचमानयेदिति द्वि
तीयः ॥ गार्हपत्यार्थं मंथनमेव दक्षिणाग्न्याहवनीयौ यथास्थिताविति तृतीयः ॥ अथवा मथि
त्वा विद्यमानमाहवनीयं दक्षिणाग्निं चानुगमयित्वा पुनः प्रणयेदिति चतुर्थः ॥ अथवा सह भ
स्मना माहवनीयं गार्हपत्यायतने निधाय पुनरुद्धरणमिति पंचमः ॥ अत्र प्रथमद्वितीयपंच
मपक्षेषु प्रायश्चित्तं विधाय होमोत्तरं गार्हपत्योत्पत्तिर्मंथनेनैव ॥ एते पक्षाः शाखांतरे ऽप्युक्ता
इति सूत्रकारेणाप्यनुमताः ॥ माधवाचार्याणां ब्राह्मणोक्तः पंचमः पक्षः संमतः ॥ अनुगतेषु ११

दक्षिणेन विहारं

आश्वलायनेन यथासंभवमनुष्ठेयं ॥ इदं प्रायश्चित्तमाहवनीयदक्षिणाग्न्योरजस्रपक्षे न भवति
॥ तत्र पूर्वोक्तप्रकारेण गार्हपत्यं मथित्वा तपस्वतीहोमात्रं ॥ अग्निहोत्रद्रव्याधिश्रयणार्थं गार्हप
त्याद्धृतेष्वंगारेषु यदि उद्धृतस्य गार्हपत्यस्य च नाशस्तदा गार्हपत्यं मथित्वा तपस्वतीहोमि
त्यादिहोमं वा विधाय पुनरंगारनिर्हरणादिहोमं समापयेत् ॥ आपोढमात्रानुगमे पुनरपोह्य
सर्वप्रायश्चित्तं विधाय भुवः स्वाहेति दक्षिणाग्नौ जुहुयात् ॥ आपोढे वर्तमाने गार्हपत्यानुग
मने ऽपोढैकदेशं गार्हपत्ये निधाय सर्वप्रायश्चित्तं भुव इत्याहुतिश्च ॥ आपस्तंबानां तु गार्ह
पत्यनुपशांते ऽलकयोनित्वे दक्षिणाग्निमाहवनीयं चानुगमयित्वा गार्हपत्यभस्मनानित्यार
णी संस्पृश्य इतः प्रथमं जज्ञे अग्निः स्वाद्योनेरधिजातवेदाः ॥ स गायत्र्या त्रिष्टुभा जगत्या

भा०प्रा०

१२ देवेभ्यो हव्यं वहन्नः प्रजानन्निति मथित्वा जातमग्निं अग्ने सम्राडभिद्युम्नैरमसस्व सदसे घृ-
न्वायोजैप्पत्यायेति अभिमंत्र्य सम्राडग्निर्विराडग्निस्सारस्वतो त्वौ सौ समिंधतामग्नाहंता
न पत्यायेत्युपसमिध्य तत्रस्थौ गार्हपत्यायतने निधाय पूर्ववत्प्रणीय तपस्वतीष्टिः॥ इध्माब-
र्हिषौ मित्रादिहोमः॥ सच॥ मित्राय स्वाहा॥ वरुणाय स्वाहा॥ अग्नये स्वाहा॥ अग्नये व्रतपतये
स्वाहा॥ अग्नये तपस्वते जनद्वते पावकवते स्वाहा॥ अग्नये शुचये स्वाहा॥ अग्नये ज्योति-
ष्मते स्वाहा॥ सूर्याय स्वाहा॥ भूः स्वाहा॥ भुवः स्वाहा॥ सुवः स्वाहा॥ भूर्भुवः सुवः स्वाहा॥
चतुर्थ्यन्ता देवताः॥ व्याहृतीनां अग्निवायुसूर्यप्रजापतयः॥ ततः पूर्ववदग्निहोत्रहोमः॥
आपस्तम्बानामग्निहोत्रार्थं प्रणीतोऽग्निः पुरा होमादुपशाम्येत्तदा सायंचेत्स्वर्णमयतः १२

एवं दक्षिणाग्न्यनुगमनेपि विशेषानुपदेशात्तपस्वतीष्टिः॥२
उद्धृताहवनीयानुगमननिमित्तं ज्योतिष्मतीष्टिर्वारुणेष्टिस्थाने पूर्णाहुतीर्जुहोति आहवनीये एवं सर्वत्रियोज्यं प्रणयनात्पूर्वं संकल्पः २

हृत्वोद्धरेत्॥ रजतमयतः कृत्वा प्रातरुद्धरेत्॥ ततोऽग्नये ज्योतिष्मते वरुणाय चेष्टिः॥ इदं च
प्रायश्चित्तं पूर्वाहुतेः प्राक्॥ एवं दक्षिणाग्न्यनुगमनेपि॥ विशेषानुपदेशात्॥ इष्टिसंभ
तेष्वेवाग्निषु वे पूर्णाहुतिर्यथाशक्ति दानं च॥ ततः प्रकृतिवद्धोमः॥ आपस्तम्बानां होमकालात्पूर्वमा
हवनीयानुगमने॥ प्रातःकाले गार्हपत्यादन्यमाहवनीयं मंथित्वा तत्रस्थौ वा प्रणीय सर्वप्रायश्चि
त्तं कर्तव्यं॥ नानुगतेष्टिः मित्रादयो वा॥ तत्र होमकालः परिस्तीर्णे बर्हिषि उद्धृते हविष्यधिश्रि
ते वा॥ बर्हिर्बिह हविष्यासादिते वा॥ एतस्मात्प्रागिदमेव प्रायश्चित्तं कर्तव्यं॥ सायंकाले तु विसृ
ष्टानीमारभ्य तस्नीधाहरणादि परिस्तरणान्तं गार्हपत्यदक्षिणयोः कृत्वाहवनीयस्याप
न्यानुपविष्टायां यजमानस्यनातिक्रमणं नवत्रप्रवेशानं॥ अध्वर्युर्गार्हपत्यदक्षिणाग्नीप

शिषिच्यमधाराकरणंहविःसंस्कारादिसमिद्दुपधारणांतंकुर्यात् ॥ ततोयजमानोबहुविदग्निमु
द्धरेत्याह ॥ बहुविदाचार्योहोत्रेत्यग्निमुद्धरति ॥ यजमानोभूर्भुवःस्वरित्युद्ध्रियमाणमग्नि
मनुमंत्रयस्वगृहेश्रियंवस्कःबहुविदेदद्यात् ॥ बहुविदग्निंनयति ॥ ततपश्चादग्निहोत्रेणमहाध्व
र्युर्गच्छति ॥ बहुविदग्निपतनयइत्यग्नौस्थापितेध्वर्युरन्यस्मैकचंचहायाहवनीयस्येआधानमं
धनवशिस्नरणानिकरोति ॥ ततोयजमानोनिक्रम्यविष्णुरमीत्याचामति ॥ ततोध्वर्युराहवनीयं
परिषिच्यधारांस्थापयित्वोपवेशनेनिहविशमाद्यविष्णुरमीत्यादिहोमंसमापयेत् ॥ मार्जनांतेज्यो
तीष्मताप्तिः ॥ मित्रादयोवा ॥ मित्रादिपक्षे ॥ हविरामादनोत्वरंमित्रादीन्हुत्वाहोमंसमापयेत् ॥ द
क्षिणाग्नेरुद्धरणानंतरंहोमारंभात्पूर्वमनुगमनेएनंप्रविशानीतिदक्षिणाग्निंयोनितःप्रणीय १२

आहवनीयेसर्वप्रायश्चित्तंजुहुयात् ॥ त्वंनोअग्ने ॥ सत्वंनोअग्ने ॥ व्याहृतिभिश्चजुहुयात् ॥ सभ्या
वसथ्ययोरुत्सर्गेप्रणयनंसर्वप्रायश्चित्तंच ॥ सायंप्रातर्वापूर्वोक्तचतुर्विधहोमकालेतदु
तआहवनीयोनुगच्छेत् ॥ तदाप्राणउदानमप्यगात्स्वाहेतिगार्हपत्येआज्याहुतिंहुत्वाहव
नीयावक्षाणमंथनं ॥ तदभावेभस्मनालौकिकारणीसंस्पृश्यमंथयेत् ॥ तदभावेसमंत्रंप्रणीय
प्रसक्तेवदग्निहोत्रहोमः ॥ नानुगतेहविर्मित्रादयोवा ॥ विशेषेणसामान्यबाधात् ॥ एवंगार्हप
त्यानुगमनेउदानःप्राणमप्यगात्स्वाहेत्याहवनीयेहुत्वानित्यारणीभस्मनासंस्पृश्यमंथये
त्ततोहोमसमाप्तिर्नान्यत्प्रायश्चित्तं ॥ एवंदक्षिणाग्न्यनुगमनेव्यानउदानमप्यगादितिगार्हपत्ये
हुत्वायोनितउत्थाप्यपूर्ववद्धोमसमाप्तिः ॥ एवंसभ्यावसथ्ययोरनुगमनेयोनितउत्पत्तिःसर्वप्रा

यश्चित्तं च ॥ आहवनीयहोमे कृते ऽग्न्यंतरे ऽनुगते नोत्पत्तिस्तत्कर्मणां लोपश्च अनाज्ञातत्रयं जपेत्
॥ गार्हपत्यस्य सर्वावस्थायामनुगमने मंथनं न पत्नी हविर्मित्राद्यो वा ॥ अथ होमकाले गार्ह-
पत्याहवनीयावनुगच्छेयातां तदानाज्ञातमिति त्रयं जपित्वा गार्हपत्यं मथित्वायतने निधा-
य प्राणउदानमप्यगात्स्वाहेति गार्हपत्ये आज्याहुतिं कृत्वाहवनीयं मथित्वायतने निधाय
गार्हपत्यार्थमाहवनीये उदानः प्राणमप्यगात्स्वाहेति जुहोति ॥ यदि गार्हपत्यदक्षिणाग्नी
युगपदनुगच्छेयातां तदानाज्ञात त्रयं जपित्वा गार्हपत्यार्थमुदानः प्राणमप्यगात्स्वाहेत्या-
हवनीये कृत्वा मथित्वा गार्हपत्ये निधाय तस्मिन्व्यानउदानमप्यगात्स्वाहेति कृत्वा तस्मिन्द-
क्षिणाग्नेः प्रणयनं ॥ एवं दक्षिणाग्न्याहवनीययोरनुगमने प्राणउदानमप्यगात्स्वाहेति गा- १४

र्हपत्ये कृत्वाहवनीयं मथित्वा निधाय व्यानउदानमप्यगात्स्वाहेति गार्हपत्ये कृत्वा दक्षिणा-
ग्नेः प्रणयनं ॥ एवं होमकाले सर्वे चेदनुगच्छेयुस्तदा गार्हपत्यं मथित्वा निधाय यां दिशं प्र-
तिवातो गच्छेत्तां दिशमाहवनीयमुद्धृत्य वायवे स्वाहेति तस्मिन्नाज्याहुतिं कृत्वा पूर्ववद्विहारं कृत्वा प्रा-
चमाहवनीयमुद्धृत्य दक्षिणाग्निमानीय यथावल्लनं ततो ऽग्रे होमं समापयेत् ॥ न तत्र पत्नी हविर्मित्रा-
द्यो वा ॥ पूर्वोक्तहोमकाले सर्वेषामनुगमे यथायोग्यमुत्पत्तिः यथाविहितं प्रायश्चित्तं कर्तव्यं ॥ क-
र्माऽपवर्गज्ञाने आधानक्रमेणैव स्थापनं ॥ केचित्तु त्रयाणामनुगमने गार्हपत्यं मथित्वान्यो ऽग्नी
यवायवे स्वाहेति पूर्णाहुतिमाहवनीये कृत्वा तस्मिन्हविः कृत्वाद्ध्ययजमान आहवनीयस्य पश्चादु-
पविश्य स्वयमेवाग्निहोत्रद्रव्यं पिबेत् ॥ तंडुलादिकं कठिनद्रव्यं तु भस्मन्येव ॥ इदमेवाग्निहोत्रं

भा·प्रा·
१५

धा

प्रायश्चित्तं च॥ आश्वलायनानामाहवनीये पूर्वाकृतौ कृतायामाहवनीयोनुगच्छेत् तदा हिरण्यं
निधायोत्तरां कुर्यात्॥ ततो गार्हपत्ये सर्वप्रायश्चित्तं हरिस्मरणं च॥ तत्र स्रुक्तपनादिनिव
र्त्तते॥ आपस्तंबानां पूर्वाकृतौ कृतायामाहवनीयानुगमने अग्निर्हरो हारावग्निः स्वाहेति काहे
तुं कुर्यात्॥ तदभावे तस्मीं हिरण्येति समानमन्यत्॥ अथ सर्वेषामनुगमने ज्ञाने आदित्योस्तमि
यादभ्युदियाद्वा तदा ह्याधेयं पुनराधेयं वा कर्त्तव्यं॥ इदं त्रयाणामेकयोनित्वे॥ दक्षिणाग्नेर्भिन्नयो
नित्वे गार्हपत्याहवनीययोरेवानुगमने पुनराधानमित्याश्वलायनानां॥ अथाग्निहोत्रद्रव्ये दुग्धा
दिषु प्रायश्चित्तं॥ तत्र यस्याग्निहोत्रिणो गौर्वत्सेन संगता दोहसमाप्तेः प्राक् उपविशेत्तामध्वर्युर
भिमंत्रयेत यजमानो वा॥ यस्माद्भीषा निषीदसि ततो नो अभयं कृधि॥ पशून्नः सर्वान्गोपाय न १५

मो रुद्राय मीढुषे इत्यनेन॥ तत उत्थापयेत्॥ उदस्थाद्देव्यदितिरायुर्यज्ञपतावधात्॥ इंद्रा
य रुण्वती भागं मित्राय वरुणाय चेति॥ अथैनां ब्राह्मणाय दत्वाऽन्यां दुग्ध्वा होतव्यं॥ अथवा
जलपात्रं पूर्णं तस्या मुखे स्तनप्रदेशे चानीय पुनस्तामेव दुग्ध्वा तद्दुग्धं ब्राह्मणं पाययेत्॥ तस्य
यावज्जीवं संवत्सरं वा यजमानो नाद्यात्॥ नात्र तस्या दानं॥ अथ सैव दोहनकाले शद्वं करोति चे
त्तदा सूयवसाद्भगवती० मा च रंतीमिति तृणं प्राशयेत्॥ आपस्तंबस्य यस्माद्भीषाऽन्यपदः
ततो नो अभयं कृधि अभयं नः पशुभ्यो नमो रुद्राय मीढुषे इत्यभिमंत्र्य॥ उदस्थाद्देव्यदितिर्वि
श्वरूप्यायुर्यज्ञपतावधात्॥ इंद्राय रुण्वती भागं मित्राय वरुणाय चेत्युत्थाप्य तां ब्राह्मणाय द
त्वान्यां दुग्ध्वा होतव्यं॥ अथवा सूयवसेति तृणं प्राशयित्वा तामेव दुग्ध्वा होमः॥ नात्र तस्या दानं॥

शाह्रकरणे यस्माद्भीषा वाशिष्ठां इत्यभिमंत्र्य ॥ सूयवसेति तृणं प्राशयेत्तामेव दुग्ध्वा होमः ॥ अथ सा
यदि शोणितं क्षरेत्तदाग्निः शेषं दोहयित्वा तद्दुग्धं गार्हपत्ये शाले भस्मनि निनयेद्दत्त्वान्येन द्रव्ये
णाग्निहोत्रं तु जुहुयात् सर्वप्रायश्चित्तं हरिस्मरणं च ॥ आपस्तंबानां तु ॥ अध्वर्युर्यजमानाद्दि
गुत्क्रामते त्युल्कादक्षिणाग्निं कृत्वा दिग्भिः परिश्रित्य तस्मिन् श्रपयित्वा तत्संस्थं सर्वं जुहुयात् ॥
ततस्तां गां ब्राह्मणाय दत्त्वान्यां दुग्ध्वा होतव्यमग्निहोत्रमिति ॥ अथ गार्हपत्योधिश्रितं स्थालीमन्न
लेन स्रवति चेत्तदा गर्भं स्रवं तमग्रधम कर्माग्निहोत्रं पृथिव्यं तरिक्षं यते श्रू त्वद थावेवतन्मा
भिप्राप्नोति निर्ऋतिं परस्तादित्यभिमंत्र्य सर्वप्रायश्चित्तं विधाय शेषेण जुहुयात् ॥ ॥ अथ स्क
न्नप्रायश्चित्तं ॥ यद्द्रव्यं स्थालीभेदनेन भूमौ पतितं यच्च स्कन्नं तद्वन्मात्रं दुग्ध्वातिरिक्तं ॥ सम १९

द्रवप्राहिणो मिस्त्वां यो निमभिगच्छत ॥ अरिष्टा अस्माकं वीरा मयि गावः संतु गोपताविति अभिम
न्त्र्य जले प्रक्षिप्य होमपर्याप्तौ शेषेण होमः ॥ अशेषस्कंदनेऽन्यद्द्रव्यमुत्पाद्य होमसमाप्तिः ॥
दुग्धे तु दोहनावस्थायां स्कन्ने यदद्य दुग्धं पृथिवीमसृप्त यदोषधीरत्यसरद्यदापः ॥ पयो गृहे
षु पयो अघ्न्यायां पयो वत्सेषु पयो अस्तु तन्मयीत्यभिमंत्र्य तज्जले प्रक्षिप्य दोहने यदवशि
ष्टं तेनाग्निहोत्रं जुहुयात् ॥ प्रधानपर्याप्तौ तावतैव होमो भक्षणादेर्लोपः ॥ प्रधानपर्या
प्तौ पुनरन्यदानीय यथापूर्वं संस्कृत्य जुहुयात् ॥ एतत्प्रायश्चित्तमधिश्रयणात्पूर्वं ॥ अधिश्रि
ते च दुग्धे प्राचीनहरणे प्रजापते विश्वभृत् तन्वं हुतमसीत्यभिमंत्र्य शेषेण जुहुयात् ॥ मा
वापचारे भक्षणापर्याप्ते विते नैव होमः ॥ अशेषस्कंदने तत्रैवोपविश्य प्रजापतेरित्यभि

भा·प्रा·
१७ मंस्याग्निहोत्रस्थालीमन्येनानीयतत्रैव चतुरुन्नीयाहवनीयस्य पश्चान्निधाय होमं समापयेत्
॥ बर्हिःस्थापनोत्तरमप्ययमेव प्रकारः॥ पयोतिरिक्ते द्रव्ये छिद्रयप्योत्तरं स्कंदने जलेन प्रतिषिच्य
तद्द्रव्यमभिमंत्रयेत्॥ दिवं तृतीयं देवान्यज्ञो गात्ततो मा द्रविणमाष्ट॥ अंतरिक्षं तृतीयं पितॄन्य
ज्ञो गात्ततो मा द्रविणमाष्ट॥ पृथिवीं तृतीयं मनुष्यान्यज्ञो गात्ततो मा द्रविणमाष्टेति॥ पयोरोज
सारूक्षितास्त्रं मांशिवायेभिवीरन्मा शाविष्ट॥ यापत्येनेभ प्रतातासहोभिर्विस्रुअगन्वरु
णा पूर्वं प्रहृतावितिच॥ अवशिष्टं दुग्धं वत्॥ यदि स्थाल्यां शेषो न स्यात्तदा॥ आज्यं गृहीत्वाय
थासंभवं संस्कृत्योन्नीय जुहुयात्॥ यजमानस्यापरहोमकालादनशनं॥ वारुणी जपो वारु
ण्या होमोऽनशनमित्येतत्त्रयं॥ मात्रापचारे पुनरुन्नीयहोमे आज्येन होमे च भवति॥ एतेष्वेव १७

पक्षे पुनरुद्धरणादि होमो गाणगारिमते॥ नाचार्यमते॥ अथाग्निहोत्रद्रव्यमधिश्रितं शाहृये
त्तदा तद्द्रव्यं समोषामुमित्यभिमंत्र्य सर्वप्रायश्चित्तं हरिस्मरणं च कृत्वा होमं कुर्यात्॥ उद्दा
ननमसमये विष्यंदने मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां पिपृतां नो भरीमभिः॥ इत्येत
याहवनीयस्य भस्मांते निनीय शेषेण जुहुयात्॥ अशेषे द्रव्योत्पत्तिः॥ अग्निहोत्रद्रव्ये गा
र्हपत्येधिश्रिते केशकीटादिकमापद्येत तदा तत्सर्वं स्रुचि प्रक्षिप्याहवनीयं प्राप्य तत्संसीम
त मिधमाधायाहवनीयादुत्तरतस्तं भस्मनिःसार्य तस्मिन्सर्वं हुतं जुहुयान्मनसा मंत्रमुच्चरेत्
एवमुन्नीतेप्ययमेव प्रकारः॥ यद्युपनेतुं शक्यं न द्द्पनीयशेषस्यान्येनाहृतेन जुहुयात्॥ अ
थाधिश्रितमग्निहोत्रद्रव्यं दुग्धं केशकीटादिना व्यापन्नं मध्यमेन पलाशपर्णेन प्रजापतेन

त्वं॰ वयं॰ स्याम॰ यीणामिति वाल्मीकविले जुहुयात्॥ तूष्णीं वा जले प्रक्षिप्य द्रव्यांतरमुत्पा
द्य होमः॥ अग्निहोत्रद्रव्ये भिन्ने होममिच्छोजनान्याः॰ जुहोतेत्येकां समिधं कृत्वा बहुलं तिव होमः
पूर्वाहुतौ कृतायामुत्तराहुतिद्रव्ये स्कन्ने॰ यत्र वेत्थ वन॰ मयेति समिधमाधाय शेषेण जुहुया
त्॥ सर्वस्कंदने तत्रैव स्थालीमानीय पुनरग्निरभ्युन्नीय यत्र वेत्येति समिधमाधाय उत्तराहु
तिप्रभृति कुर्यात्॥ इत्याश्वलायनानामग्निहोत्रद्रव्ये स्कन्ने प्रायश्चित्तं॥ अथापस्तंबानां॥ य
द्दुह्यमानं स्कंदेत्तदायदद्यदुग्धं पृथिवीमस्कन्त्वयदोषधीरत्यसरद्यदापः॥ पयो गृहेषु पयो
अघ्न्यासु पयो वत्सेषु पयो अस्तु तन्मयीत्यभिमंत्र्य॥ समुद्रं वः प्रहिणोमि स्वां योनिमभिग
च्छत॥ अरिष्टाः प्रजया भूयास्म मा परासेचि मत्पय इत्यप्सु ह्यसर्वप्रायश्चित्तं कृत्वा शेषेणाहो १८

मः॥ यजमानपत्न्योरागामिहोमकाल्यादनशनं॥ सर्वस्कंदने न्यां दुग्ध्वा होमः॥ स्थाली अयोग्या चे
दन्यामानीय संस्कृत्य तस्यां दुग्ध्वा होमः॥ भिन्नामप्सु प्रक्षिपेत्॥ अथ तस्य दशावस्था भवंति
॥ दुह्यमानं दुग्धं क्रियमाणं हृतं॥ अधिश्रयमाणं॥ अधिश्रितं॥ उद्वास्यमानं॥ उद्वासितं॥ उन्नी
यमानं॥ उन्नीतं॥ एतास्ववस्थास्व सर्वस्कंदने पूर्वोक्तं स्कन्ने प्रायश्चित्तं कृत्वाऽवशिष्टेनैव यथाक्र
मं चिहोमः॥ सर्वस्कंदने स्कन्न प्रायश्चित्तं विधायान्यां दुग्ध्वा होमः॥ एवमन्यद्रव्येण दानीय हो
मः॥ चतुरवत्तीनां चतुरवत्तान्याक स्कंदने स्कन्न चिगतं स्थाल्यामानीय पुनरुन्नीय होतव्यं॥ चतुर्थो
न्नयनोत्तरं सर्वस्कंदने अस्कान्द्यौः पृथिवीमस्कान्वृषभो युवा गाः॥ स्कंनेमा विश्वा भुवना स्कंनो य
ज्ञः प्रजनयतु॥ अस्कान्नजनि प्राजनि आ स्कन्नाज्जायते वृषा॥ स्कन्नात्प्रजनिषीमहीति स्कंन॰

मभिमंत्र्य॥ इदं भयदर्शिवीभिंधीदं दिव्यं नभः॥ उद्धौ दिव्यस्य नो देहीशाने ऽविसर्जनादिति मि
त्यद्भिरवोक्ष्य॥ यजमानपत्न्योराग्निहोमकालादनशने॥ पुनरन्यां दुग्ध्वा होमः॥ उर्वंतरिक्ष
मित्यारभ्य दशाहोत्रसमाप्तिपर्यंतं यदि अकृतं द्रव्यं शुचौ देशे स्कंदेत्तदा नदेव गृहीत्वा याह
कीह कृत्वा होतव्यं॥ मार्जनांते पुनर्द्ध्याद्दानादि होमं समाप्य जुह्वां स्कन्नं गृहीत्वा अव ते हेडो व
रुणनमोभिरवयज्ञेभिरीमहे हविर्भिः॥ क्षयंनस्मभ्यमसुरप्रचेतो राजन्नेनांसि शिश्र
थः कृतानि इत्युक्त्वा उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमं श्रथाय॥ अथा वयमादित्य
व्रतेतवानागसो अदितये स्याम स्वाहेति जुहुयात्॥ होमशेषं समापयेत्॥ अशुचिदेशे स्कंदने
ऽस्कन्नानित्यादि प्रायश्चित्तं विधाय वारुणीभ्यामेकाहुतिं हुत्वा पुनः स्थाली तद्द्रव्यहोमशेषं स १८

मापयेत्॥ यजमानयोरनशने॥ एवं सर्वेषु पक्षेषु यथायथमूह्यं॥ पूर्वाहुतौ हुतायामवशिष्टं यदि स्कंदे
त्॥ पूर्वाहुतौ सर्वं वापनेत्॥ तदा स्थाल्याग्निर्भूत्वीय यत्र वेत्थ इत्यादि पुनर्होमं कुर्यात्॥ अत्या
वशिष्टेनैव होमः॥ स्रुवमात्राद्दूनस्कंदने सर्वप्रायश्चित्तं॥ आग्निहोमकाले यजमानपत्न्यो
रनशनं सर्वेषु पक्षेषु॥ तंडुलादि होमे सजातीयद्रव्यानयनं च॥ अग्निहोत्रद्रव्ये श्राह्यमाने ध्व
र्जः समीपयजमानहृदयारमित्युक्त्वा सर्वप्रायश्चित्तं कुर्यात्॥ स्कन्नादि प्रायश्चित्तं॥ अथाग्नि
होत्रं नरागमने आश्वलायनानां प्रायश्चित्तं॥ अग्निहोत्रद्रव्ये कुशोपयमादि लेन नराश्वः शकटः श्वा
वा पुरुषो वा मध्येऽग्नीनां गच्छेत् तदा श्वातिक्रमणं पुनोगमने भस्मना पुनः पदं पूरयेत्॥ इदं वि
ष्णुर्विचक्रम इति मंत्रेण॥ प्रतिपदं मंत्रः॥ भस्मधारामुदकधारां च तंतुं तन्वन्॰ व्यंजनमिति॥

गार्हपत्याहवनीययोरंतरा कुर्यात्॥ प्रतिधारं मंत्रावृत्तिः॥ आहवनीयमनुगमय्य पुनः प्रणीय
यदग्ने पूर्वं प्रहितं हितेः सूर्यस्य रश्मीनन्वाततान॥ तत्र रयिष्ठामनु संभवैतां सं नः सृज सुम
त्या वाजवत्या॥ त्वमग्ने सप्र॰ च्वन इति उपस्थानं॥ एवं कृत्वाग्निहोत्रहोमं समाप्य पुनर्विहर
णादि कार्यं कृतीहिः॥ अत्राशक्तौ पूर्णाहुतिः शक्त्या दानं च॥ आपस्तंबानां तु॥ अग्निहोत्रे धिष्णि
नेंतरा यदि श्वा गच्छेत्तदा गार्हपत्याद्भस्म गृहीत्वा गार्हपत्यादाहवनीयपर्यंतमिदं विष्णुरि
त्यनेन भस्मलेखां कुर्यात्॥ तेनैव मंत्रेण भस्मनाश्वनः पदं प्रच्छयेत्सर्वप्रायश्चित्तं च॥ उद्धार
सनादूर्ध्वं पूर्वोक्तं विधाय उदकेन प्रोक्षणं गोराक्रमणं चाधिकं॥ अथाग्निहोत्रहोमकालातिक्रमे
प्रायश्चित्तं॥ होमकालश्च॥ सायं नवनाडिकाः॥ प्रातर्दश॥ तदतिक्रमे वक्ष्यमाणं प्रायश्चित्तं॥ तत्रसा २०

माज्यं संस्कृत्य स्रुचि चतुर्गृहीतं गृहीत्वा यदि सायं॥ दोषावस्तर्नमः स्वाहेति आहवनीये जुहुया
त्॥ यदि प्रातः॥ प्रातर्वस्तर्नमः स्वाहेति जुहुयात्॥ ततोऽग्निहोत्रद्रव्यमाहवनीयस्य पश्चात्सा
दयित्वा भूर्भुवः स्वरिति जपित्वा वरं दत्वा होमं कुर्यात्॥ एतत्सर्वमेककर्तृकत्वं॥ वरशब्दे
न गोदानं॥ तदभावे यथाशक्ति निष्क्रयः॥ समाप्तेऽग्निहोत्रहोमे नैष्ठे वाग्निषु वारुणीभिः कु
र्व्येति सायं॥ तत्स्थाने पूर्णाहुतिर्वा॥ यदि प्रातस्तदा प्रातर्वस्तर्नमः स्वाहेति हुत्वाग्निहो
त्रमुपसाद्य भूर्भुवः स्वरिति जपित्वा होमं समापयेत्॥ तत आहवनीयमनुगमयित्वा पु
नः प्रणयेत्॥ इहैव क्षेम्य एधि मा प्रहासीरेव दत्रं कौशिकमिति यजमानस्य नाम गृह्णी
यात्॥ ततः इष्टिः॥ मित्रः सूर्यश्च देवते॥ तदशक्तौ पूर्णाहुतिर्वा॥ समाप्याग्निहोत्राग्य

श्वोभूते

तोऽभ्युत्थायाग्नीन्समिंधानौ पत्नीयजमानौ आसायमासाते अनश्नंतौ॥ ततः सायंकाले ते द्वे वा॰
ग्निषु द्वयोर्गवोर्दुग्धेन होमः॥ अयमत्र विशेषः॥ एकस्या गोर्दुग्धमधिश्रित्य तस्मिन्नेव प
यसि द्वितीयमानयति॥ तेन पयसा होमं समाप्याग्न्योरुपवर्गः॥ ततः पुनः प्रणीयेहि द्विती
यया कर्तव्या॥ तस्यामग्निर्व्रतभृत्कुर्यात्को देवता॥ तच्छाने ष्टर्या कुर्तिर्वा॥ एतत्प्रायश्चित्तं॰
स्वकाले प्रणीतेष्वग्निषु होमकालातिक्रमे भवति॥ अप्रणीतेषु पूर्वोक्तकालातिपत्तौ आ
पदि अनुद्धरण प्रायश्चित्तमाचंद्रं कृत्वा होमः कर्तव्यः॥ अनापदि मनोज्योतिर्जुषतामाज्यं
मे विच्छिन्नं यज्ञं समिमं दधातु॥ या इष्टा उषसो या अनिष्टास्ताः संतनोमि हविषा घृतेन स्वा
हेति कृत्वा॥ अनुद्धरण प्रायश्चित्तं विधाय होमः कर्तव्यः॥ एवं विहृतेष्वग्निषु कृतेषु होमोत २१

अ

तरकालप्राप्तौ पूर्वहोमं कालातिपत्तिप्रायश्चित्तसहितं विधाय वर्तमानहोमं अनुद्धृत प्रायश्चित्त॰
सहितं कुर्यात्॥ अनुद्धृतेष्वग्निषु कालांतरप्राप्तौ मनस्वतीहोमं विधाय अतिपन्नहोमं च कृत्वा
अनुद्धरणप्रायश्चित्तपूर्वं मुख्यकालीनो मुख्यः॥ एवमनेककालातिपत्तावपीति द्रष्टव्यं॥ विह
तेष्वविहृतेषु वानेककालातिपत्तावपि मनस्वतीहोमः प्रतिहोमं च कार्यः॥ इति कालातिप॰
त्तिप्रायश्चित्तमाम्नायपत्तानां॥ अथापस्तंबानां॥ सायं नव नाडिकाः होमकालः तदतिक्रमे
सायंकाले प्रायश्चित्तं॥ आज्येन दोषावस्तोर्नमः स्वाहेति जुहोति॥ अग्निर्देवता॥ ततो गोदोह
नादि व्याहृति जपांतं कृत्वा यथाशाखं प्राणं नामित्वा पयसाग्निहोत्रं हुत्वा होष्यंते भूर्भुवः सु
वरिति पश्चात् होमशेषं समापयेत्॥ अत्र यजमानोऽध्वर्यवे वरं दद्यात्॥ अध्वर्युराहवनीय

मनुगमय्यान्वग्निरुद्धसामथ्यमरव्यादन्वहानि प्रथमोन्नात वेदाः॥अनुसूर्यस्यप्युरुत्थाचर॰
श्मीनुद्धृत्यावादधिवीआनतानेत्यन्यमाहवनीयं प्रणीय॥एकयोनि त्वेदक्षिणाग्निमधिश्र
णायेत्॥एवं सभ्यावसथ्यावपितनोयजमानइहैवह्रेम्य एधिमा प्रहासीर्मादेवदत्तं कौ
शिकमितित्स्वनामग्रहीत्वादित्यमुपतिष्ठते॥ततोध्वर्युर्मित्रदेवतामिष्टिं निर्वपेत्॥
मैत्रश्चरुः॥पौर्णमासवत्सौर्यमेककपालमित्तिकेचित्सोपि पौर्णमासवत्॥आशाकौ प्र
र्णाकृत्तिर्मित्राहुर्योवा॥ततोयजमानयोरनशनमग्निसमिंधनं वाग्यमनं दध्योर्दुग्धेनसायं
होमइतिसमानं॥प्रातःसंगवातिक्रमेप्रातर्वस्तोर्नमःस्वाहेत्याज्येनाहवनीयेहोमः॥अग्नि
र्देवता॥शेषं पूर्ववत्वरदानांतं नात्रेष्टिः॥अनुद्धृतेनावनुद्धरणप्रायश्चित्तमपिकर्तव्यं॥ २२

आपन्नतस्यानाक्तानजपोहोमश्च प्रकृतिवत्नान्यत्प्रायश्चित्तं॥अनुद्धृतआहवनीयेयदिसूर्यो
स्तमियात्॥तदाबहुविदं ब्राह्मणंआनीयतेनोद्धरणादि निधातांतंकारयेत्॥प्रणयनेन्यः
कश्चिद्दर्भैर्हिरण्यंबध्वाग्रतोनयेत्॥ततोग्निहोत्रमुपसाद्येत्यादि वारुणीष्टिंतं सायंकर्त
व्यं॥अनुद्धृतेयद्यभ्युदियात्तदाबहुविदमानीयचतुर्गृहीतमाज्यं दर्भरहितं रजतं चाग्र
तोहरन्नुद्धरणं कारयेत्॥ततःआहवनीयस्यपुरस्तान्निधायसुरवर्णमुपविश्य उषाःकेतुनाजु स्ना
षतांस्वाहेतिकृत्वाग्निहोत्रमुपसाद्येत्यादिवत्तन्मरदिष्टिंतं कुर्यात्॥नात्राहवनीयानुगमनं॥
तेनाग्निहोत्रार्थेचेवाग्निषुमायं होमांतं कर्तव्यं॥इत्यासन्नायननामनुद्धरणप्रायश्चित्तं॥अ॰
पापस्तंबानां॥सायमनुद्धृतआवेहनीयेगार्हपत्यइध्माआनादिपरिस्तरणांतं कृत्वादुग्धेप

पसिपत्न्यांचोपविष्टायांगार्हपत्यंपरिश्रित्याथेध्मादानादिसमिदुपधारणांतंकरोत्यध्व
र्युः॥ ततोयजमानोबहुविदमानीयसबहुविद्वाचात्वाहोत्रेत्याहवनीयमुद्धरति॥ यज
मानोभूर्भुवः सुवरित्युद्ध्रियमाणमनुमंत्रयते॥ अन्योदर्भेणहिरण्यंबद्ध्वाग्रतोनय
ति॥ ततोबहुविदाग्नौप्रणीयमानेध्वर्युः पश्चादग्निहोत्रेणसहगच्छति॥ ततआयतनेहिरण्ये
निहितेबहुविदग्निपतनयइतिमंत्रेणहिरण्येग्निंप्रतिष्ठापयति॥ एकयोनित्वेबहुविदेवदक्षिणा
ग्निंप्रणयति॥ ततोध्वर्युराहवनीयदक्षिणाग्न्योरिध्माधानादिपरिस्तरणांतंकरोति॥ ततोयज
मानस्यातिक्रमणमाचमनं॥ ततोध्वर्युरग्न्योः परिषेचनंधारांकृत्वाउपवेशनमितिकूर्चेहविरा
साद्यविष्णुदमीत्यादिव्याहृतिजपांतंकृत्वायथाशाखंप्राणंनासित्वाऽग्निर्ज्योतिः हविरसिभूर्भु २३

वः सुवरित्युपस्थायमार्जनांतंहोमंसमाप्याज्यमाहवनीयमेवप्रणीयवारुणंचरुंनिर्वपेत्
॥ केचित्प्रातर्वारुणेष्टिरिति॥ केचिद्वारुणींप्रातःप्रभृतीचेतिवदंति॥ यदिप्रातरनुद्धृतेसूर्योऽभ्यु
दियात्॥ तत्रसायंकालवत्समिदुपधारणांतेकृतेबहुविदग्निमुद्धरति॥ अन्योजुह्वाचतुर्गृ
हीतमाज्यमग्रतोनयति॥ ततः पूर्ववदग्नौस्थापितेयेनाज्यमानीतंसआहवनीयस्यपुरस्ता
त्प्रत्यङ्मुखउपविश्यउषाः केतुनाजुषतांयज्ञंदेवेभ्योमधुमतमं स्वाहेतिजुहोति॥ देवेभ्यइदं॥ ततो
ध्वर्युः पूर्ववदग्निहोत्रंकृत्वासायंद्वयोर्गवोः पयसाग्निहोत्रंजुहुयात्॥ पश्चांतरमपिसायंप्रातर्वा
हुतेमनोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञं समिमंदधातु॥ याइष्टाउषसोनिम्रुचश्चताः संदधा
मिहविषाघृतेनस्वाहा॥ त्रयस्त्रिंशत्तंतवोयेवितत्निरेयइमंयज्ञं स्वधयायेयजंते॥ तेषांछि

त्वं प्रत्येन हृ धामि स्वाहा घर्मो दिवा॰ इत्येतु स्वाहेति द्वे चतुर्गृहीते जुहुयात्॥ अग्नये मनस्वत इ
दं॥ देवेभ्य इदं॥ ततस्तेष्वेवाग्निषु प्रकृतिवद्धोमः॥ केचित्तु मार्गं प्रणयनभेदमाहुः॥ अनुद्धते
कालातिपत्तौ मनोज्योतिरिति द्वाभ्यां कृत्वाहोषावस्तोरिति कृत्वा दोहनादि व्याहृतिजपांते आ
नमितो रित्यादि पूर्ववत्करोति॥ यदि प्रातस्तदा पूर्ववत्कृत्वा प्रातर्वस्तोरिति च कृत्वाऽध्याहरणा
दि व्याहृतिजपांते उपामादि हृदंते व्याहृतिभिरुपस्थाने कृते ऽध्वर्यवे वरदानं॥ होमं समाप्य
तेष्वेवाग्निषु द्वयोर्गवोः पयसाग्निहोत्रं यजमानयोर्नियमश्च॥ प्रातःकाले ऽनुद्धृत आहवनी
ये कालातिपत्तौ मनोज्योतिस्त्वयग्निं शादिति द्वाभ्यां होम एव नान्यत्कुर्विदुद्धरणादि॥ का
लातिपत्ति प्रायश्चित्तेन विरोधादिति केचित्॥ अथानुदितहोमिनो यदि सूर्योभ्युदियात्तदाग्निं २४

होत्र इव्यमुपसाद्य व्याहृतिजपांते मा नमितो रश्मानमित्यादि पूर्ववत् व्याहृतिभिरुपस्थाने कृते
एकहायनो वत्सो ऽध्वर्यवे देयः॥ होमं समाप्यो मार्गे प्राणानुद्वास्यानंतरमेव पुनराधानं कर्तव्यं नव
सं नाद्यपेक्षा॥ होमलोप प्रायश्चित्तं आपस्तंबानां॥ यस्य ध्रियमाणेष्वग्निषु चत्वारो होमा विच्छिद्येरन्
तदाग्नये तंतुमते ष्टिं कृत्वा ऽनंतरातिपन्नहोमान् कुर्यात्॥ होमविच्छेदे ऽग्निविच्छेदे सति च पुनराधा
नं॥ अग्निषु ध्रियमाणेषु होमत्रयातिक्रमे मनस्वती होत्रा होमः॥ चतुर्थमारभ्य प्रागष्टमात्तंतुमतीष्टिः॥
ततऊर्ध्वं पुनराधानं॥ वेदार्थविदो होमत्रयातिक्रमे सर्वप्रायश्चित्तं तत ऊर्ध्वं सप्तदिनपर्यंतं मन
होत्रा॥ ततऊर्ध्वं पुनराधानं॥ इति होमविच्छेदे प्रायश्चित्तमापस्तंबानां॥ आश्वलायनानामग्निहो
त्रहोमे मनस्वत्याकृत्वातिक्रांतहोमः कार्यः॥ इदमेव हि त्रिहोमविच्छेदे अग्निहोत्राद्यपर्वप्रणीतमाह

वनीयमर्वाक्शम्यापरासात्तदेकदेशाः सर्वो वा उत्तरसर्पेत्तदा इदं त एकं स॰ जनितैत्तत्र इत्यनेना
यतनेसंवपेत्॥ ततः समस्तव्याहृतिर्होमः॥ आपस्तंबानां॥ यदि बाजपतिः कविरग्निर्हव्यान्य
क्रमीत्॥ इध्मं तानि दारूणि षडितिभिः प्रदक्षिणीकृत्य॥ इदं त एकमिति निसंवपेत्सर्वप्रायश्चित्तं च
॥ इदं चाहवनीयरावनान्याग्निषु॥ अन्येषु तु लौक्षेपः सर्वप्रायश्चित्तं च॥ इदमपि प्रायश्चित्तकाल
हमेव कौन स्फुलिंगमात्रे॥ शम्यापरासाधिकदेशो गतश्चेत् पाथिकृताहुतिः॥ आपस्तंबानां तद्दे
शे सर्वानग्नीन्नीत्वा तत्स्थानुरोधेन स्थापयित्वा तत्रैकत्र अनुषित्वा तस्मिन्नहानि पाथिकृता
हुतिः॥ इदं प्रायश्चित्तं दर्शपूर्णमासादिषु सर्वत्र समानं॥ अथ समारूढोग्निर्मथ्यमानो यद्यग्निहो
त्रहोमकालेन जायेत तदान्ये लौकिकमानीय तस्मिन्यहोमः कार्यः॥ एतदनुगमनेन भवति॥

अनुगते मंथनादि तपस्वतीष्टं तं प्रायश्चित्तं॥ तेनानुगमादजायमाने पिपावज्जायेत तावन्मथितव्य
मेव॥ ततस्तपस्वतीहुतिः॥ ततोग्निहोत्रहोमोनुकृतप्रायश्चित्तेन सह॥ यदि होमकालेऽतिपन्नस्तदाम
नस्वतीहोमोपि कार्यः॥ वह्न्यभावे ब्राह्मणपाण्यादि विधिः॥ तत्राह श्यावाश्वयंगानि सर्वाणि कार्या
णि॥ हस्तार्थानि यथासंभवं॥ होमोत्तरं मंथनमेव कर्तव्यं॥ ब्राह्मणवामानवरोधमांसभक्षणदर्भा
नधिशायनजलापराजेति संवत्सरं नियमायजमानस्येति॥ आपस्तंबानां समानमेवाग्निविषये
॥ यद्यनस्तमितेऽस्तमितभ्रांत्या होमो भवति॥ तदा तस्मिन्नेवाहवनीये पुनर्होमं कुर्यात्॥ होमो
त्तरं यजमानो गार्हपत्याहवनीयावुपतिष्ठते॥ भवतन्नः समनसौ समोकसावरेपसौ॥ मायज्ञ
ं हिंसिष्टं मायज्ञपतिं जातवेदसौ शिवौ भवतमद्य न इति॥ एवं प्रातः॥ उदितहोमिनामुदयात्प्र

र्वंकृतेयेतदेवप्रायश्चित्तं ॥ अग्निहोत्रार्थमुद्धृतआहवनीयेहोमात्पूर्वंपुनरन्यमुद्धृत्यहोमांतेचैवा
ग्नियेतदाग्नयेग्निवतेष्टाकपालंनिर्वपेत्तेष्वेवाग्निषुततोहोमः ॥ अशक्तौपूर्णाहुतिः ॥ समाप्ते
होमेपुनरुद्धरणेलौकिकाग्निसंसर्गन्यायेनाग्नयेविविचयेष्टाकपालःपूर्णाहुतिर्वा ॥ पुनरु
द्धरणेऽसंसृष्टेस्मृतेपश्चादुद्धृतस्याग्नेरनुगमनंविधायसर्वप्रायश्चित्तंकर्तव्यं ॥ अथयजमा
नोदेशांतरेसंस्थितः ॥ तदापत्नीस्त्विरशारापयिष्ठतीस्तुत्वाआशरीरसंबंधात्तेष्वेवाग्नि
षुयावत्तवत्सान्यवत्सेनदुग्धेनतस्याःपयसाअमंत्रकंअग्निहोत्रंकारयेत् ॥ प्रजापतिःस
र्वत्रदेवतास्थानेहोमत्वात् ॥ भक्षणंलुप्यतेसर्वहुतत्वात्नापराग्निहोमः ॥ आपस्तंबानां
तुविशेषः ॥ मरणश्रवणानंतरंपत्नीस्त्विगादिभिःपायिष्ठतीकारयेत् ॥ तत्रइज्यायांसूक्तवाके २६

वाशीर्मंत्रलोपः ॥ तेष्वेवाग्निषुशरीरसंस्कारावधि ॥ अभिवान्यवत्सायाःपयसाहोमः ॥ स
पत्न्या ॥ अध्वर्युःप्राचीनावीतीविष्टहान्यादितंत्रंसर्वंकरोति ॥ दक्षिणाग्नेःदर्भैःपरिस्तर
णं ॥ गार्हपत्यस्यदक्षिणार्धेधिष्ण्यपणादितंत्रंकुर्यात् ॥ दक्षिणतउदास्यसर्वंतंत्रंस्रु
विक्षिप्रापालाशींसमिधंअधस्तादारयमाणोदक्षिणेनविहारंगमयित्वाहवनीयस्यप
श्चात्कूर्चेस्थाप्यसमिधमाधायसकृदेवतंत्रंसर्वंजुहुयात् ॥ अन्यत्सर्वंलुप्यते ॥ स्रुचंप्र
ताप्याग्निहोत्रस्थाल्यांतृणमंस्काअविक्षेरग्नेन्यनेनाहवनीयेप्रहरति ॥ अथनिकटेऽग्ना
नांमृतस्याप्यासंस्कारादेवमेवाग्निहोत्रहोमःकर्तव्यः ॥ अग्निहोत्रस्यपूर्वाहुतौहुतायांय
जमानोमृतश्चेत्तदाहवनीयस्यदक्षिणार्धेशीतेभस्मनिअग्नयेकव्यवाहनायस्वाहेतिहु

त्वा प्राशनवर्जं होमसमाप्तिः॥ एवं पत्न्या अपि॥ अथाधानोत्तरमग्निहोत्रारंभात्पूर्वं यदि पत्नी
रजस्वला स्यात्तदा चतुर्थे दिवसे सायंकाले सम्रहोतारं कृत्वा होमारंभः॥ यदि रजस्वला श्रौ
ताग्नीन्स्पृशति तदा पुनराधानमेव कृत्वा शुचीभिः कर्तव्या॥ आधानोत्तरं केनचित्प्रतिबंधेनाग्निहोत्र
होमारंभो न कृतस्तदा द्वितीयदिवसे सायाह्ने सम्रहोतारं कृत्वा होमारंभः॥ अग्निहोत्रहोमे यदग्ने
यानि कानि चेत्युपसमिंधनादूर्ध्वमाहवनीयहोमात्पूर्वं यदि यजमानो श्रीयात्पिबेद्वा तदा॥ यत्तेव
यं पुरुषत्रा यविष्ठ विद्वांसश्चकृमा कच्चिदागः॥ कृधी ष्वस्माँ अदितेरनागान्व्येनांसि शिश्रथो वि
ष्वगग्ने॥ यथा ह त्यद्वसवो गौर्यं चित्पदि षिताममुंचता यजत्राः॥ एवा त्वमस्मत्प्रमुंचा व्यंहः प्रतार
यग्ने प्रतरां न आयुः॥ इति द्वाभ्यां आहुती जुहुयात् जपेद्वा॥ होमेग्निः स्विष्टकृद्देवता॥ उपसमिंध २७

नात्पूर्वं चेत्तदा व्रातपतीष्टिः पूर्णाहुतिर्वा॥ एवं यत्किंचिदंगलोपे तन्त्रयनेन्यूनाधिकभावे मं
त्रक्रियाविपर्यासे कर्तृद्रव्यविपर्यासे यजमानपत्न्योरसंनिधाने व्रतलोपे मार्जारादीनामं
तरागमने अन्यस्मिन्नज्ञाते दोषे अनाज्ञातं॰ पुरुषसंमितो॰ यत्पाकत्रा॰ त्वमग्ने व्रतपा॰ यद्वो
वयं प्रमिनाम॰ त्वन्नो अग्ने॰ स त्वं नो अग्ने॰ व्याहृतीश्च जपेत्॥ सर्वत्रांगनाशिध्यर्थं यज्ञपुरु
षस्मरणं च॥ अग्निहोत्रहवणी भिद्येत तदान्यामानीय तया कृत्वा भिन्नाग्निहोत्रहवणीमा
हवनीये प्राग्दंडां प्रत्यक्पुष्करां प्रास्य सर्वप्रायश्चित्तं जुहुयात्॥ आहिताग्निः प्रातरस्नातोग्नि
होत्रं जुहुयात्तदाग्नये वरुणाय चाष्टाकपालं निर्वपेत् त्वं नो अग्ने स त्वं नो अग्न इति याज्यानुवाक्ये॥
पूर्णाहुतिं वा जुहुयात्॥ ॥ इत्यग्निहोत्रप्रायश्चित्तप्रकरणं॥ ॥ अथ दर्शपूर्णमासप्रायश्चित्तं

॥तथान्वाधानोत्तरत्तत्रमाहवनीयानुगमनेअन्वाहितप्रायश्चित्तमापस्तंबमतेन॥तत्रयद्या-
हवनीयोनुगच्छेत्तदाअन्वग्निरुषसामग्रमख्यदन्वहानिप्रथमोजातवेदाः॥अनुसूर्यस्यपु-
रुत्राचरश्मीननुद्यावापृथिवीआततानेतिमंत्रेणान्यमाहवनीयंप्रणीयभूरितिमनसाय-
जमानउपतिष्ठेत॥ततआज्यंसंस्कृत्यस्रुवेणाहवनीयेजुहोति॥योअग्निंदेववीतयेहविष्मा-
ंआविवासति॥तस्मैपावकमृडयस्वाहेति॥अग्निःपावकोदेवता॥ततोनुक्रांमहगृहीत्वा॥
इदंविष्णुर्विचक्रमे।त्रेधानिदधेपदं।समूढमस्यपांसुरेस्वाहा॥विष्णवइदं॥ततोयजमा-
नोव्रतपतिं।अग्नेव्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेराध्यतां॥वायोव्र॰आदित्यव्र॰व्रताना-
ंव्र॰मग्वाउसिव्रतपाअसिव्रतपतिरसितत्तेप्रब्रवीमितच्छकेयंतेनशकेयंतेनराध्यासमिति २८

॥यदिगार्हपत्योनुगच्छेत्तदाउस्मन्नाउरण्योःसंस्पृश्यमथित्वायतनेनिधायभूरितिउपस्थायपूर्व-
वद्धुत्वायजमानोपस्थानांतंसमानं॥दक्षिणाग्नेरनुगमनेयोनितउत्पाद्यभूरित्यादियजमानो-
पस्थानांतंसमानं॥विच्छिन्नेयजनउद्धृतोल्मुकनाशेसर्वप्रायश्चित्तंदक्षिणाग्नौहुत्वापुनरुल्मु-
कोद्धरणं॥सभ्यावसथ्ययोरनुगमनेयोनितउत्पत्तिःसर्वप्रायश्चित्तंच॥होमोवाहवनीयए-
एवेत्येके॥अपरेतत्तद्भ्यावित्याहुः॥एवंचातुर्मास्यपशुसोमादौविकृतिष्वपिअन्वाहितप्रा-
यश्चित्तसमानं॥अन्वाहितगार्हपत्याहवनीययोरनुगतयोःसूर्योदयेऽस्तमयेवापुनराधा-
नंकिंतुतत्रदैन्वाहितप्रायश्चित्तमेव॥अन्वाधानात्पूर्वमनुगमनेसर्वप्रायश्चित्तंपुनःप्रणय-
नंचेतिभरद्वाजः॥आहवनीयदक्षिणाग्न्योरुद्धृतयोःप्रागन्वाधानादनुगमनेषुवइतिदक्षि-

पाग्नौ होम इति देवयाज्ञिकः ॥ अनुयानार्थोऽनुकानुगमे बौधायनोक्तं सर्वप्रायश्चित्तं विधाय
पुनराहवनीयाद्युद्धरणं ॥ तथान्वाहिताग्नेः केनचिद्धेतुना प्रयाणोपस्थितौ पृथक्भाजनैरग्नी
न्नयेयुः ॥ अथवाऽग्नीन्संस्कृत्य स्रुवेणाहवनीये तूष्णीं ताः कृ ॥ अग्नेका० रे इति कृत्वा समारोपयेत्
॥ अयं ते योनिः ऋत्वियः ॥ तं जानन्नग्न आरोहाथा नो वर्धया रयिं ॥ इत्यनेन त्रिष्वपि समारोपः ॥ गार्हप
त्ये मंत्रेणात्मसमिन्नरण्योः ॥ गार्हपत्यस्यैव समारोपणमिति केचित् ॥ दक्षिणाग्नेर्भिन्नयोनित्वे
नेनैव मंत्रेणाभिन्नारण्योः समारोपणं ॥ अथवा या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानमच्छा
वसूनि कृण्वन्नस्मे नर्या पुरूणि यज्ञो भूत्वा यज्ञमासीद स्वां योनिं जातवेदो भुव आजायमान इत्यनेन
पाणी मलं देव गार्हपत्ये प्रतितपेत् ॥ नत्वसमिन्नरण्योरिति केचित् ॥ समारोपो यजमानकर्तृक एव ॥ २८

एवमनन्वाहिताग्निर्होममकृत्वा समारोप्यैव गच्छेन्नान्यथा ॥ यदि ताभ्योः समारोपस्तदारणीस्य
ग्नीन्हत्वैव प्रत्यवरोहेति मंत्रेण मंथयेत्स्वयं वा मंथयेत् ॥ प्रतिप्रयत्नं मंत्रावृत्तिः ॥ जातेष्वग्नौ यथायत
नं स्थापयित्वा कर्मशेषं समापयेत् ॥ ततः स्वकाले होमः ॥ आपस्तंबानां तु ॥ अन्वाधानोत्तरं प्रया
णोपस्थितौ यजमान आहवनीये स्रुवेण जुहोति ॥ तुभ्यं ता अंगिरस्तम विश्वाः सुक्षितयः पृथक्
॥ अग्ने कामाय येमिरे स्वाहा ॥ अग्निर्देवता ॥ ततः पृथगरण्योः समारोपयेत् ॥ अयं ते योनिरित्यनेन
॥ प्रत्यग्निमंत्रावृत्तिः ॥ ततोऽभयरहिते देशं प्राप्य मथित्वा उपावरोहेति जपित्वा आयतने प्रतिष्ठा
प्य निर्वापान्सर्वं यदि हि कालो नातिपद्यन्स्तदारब्धां नातारभ्य समापयेत् ॥ यदि कालोऽतिपन्नो निर्वा
पो नष्टस्तदा पथिकृत्पुरोडाशेन यजेत हविः कर्तव्या ॥ यदि प्रयाणात्पूर्वं निर्वापो निर्वृत्तस्तदा पथिकृत्यौ

स्विष्टकृतं कुर्यात्॥ शेषं पूर्ववत्॥ इत्यन्वाहिताग्नेः प्रयाणे प्रायश्चित्तं॥ अथ हविर्दोषप्रायश्चित्तं॥
दर्शपूर्णमासादिषु आवाहनादूर्ध्वं प्रधानयागादर्वाक् यदि हविर्व्यापद्येत तदा तस्य स्थाने ध्रुवा
स्थं तु शेषहीनमाज्यमवदाय यजेत्॥ अव्यापन्नं यथापूर्वं समापयेत्॥ ततो व्यापन्नहविर्मात्रस्यै
वाग्न्यन्वाधानादियागः कर्तव्यः॥ एवं द्वयोर्बहूनामपि समानं॥ एवं प्रधानयागोत्तरं नाशे शेषका
र्यमाज्येनैव कर्तव्यं न पुनराहुतिः॥ हविर्व्यापत्तिश्च केशादिसंसर्गादपहाराद्वा॥ तेषां दुष्टानां जले
न्यसनं प्रक्षेपः प्रतिपत्तिः॥ सांनाय्यस्य प्रजापतेस्त्वदेतादित्यनेन वल्मीकवपायां प्रक्षेप इति वा प्र
तिपत्तिः॥ एवं प्रतिपत्तिं विधाय तद्देवताकः पुनर्यागः॥ एवं सांनाय्यं पाकसमये कुंभी
मतीत्य बहिः पतति चेत्तदा तत्पात्रांतरे आदाय परिधिदेशे होमः द्यौः प० भिरित्यनेन निनयेत्सर्वं ३०

प्रायश्चित्तं च॥ एवं सायंदोहे प्रातर्दोहे वसमाने॥ शेषेण यागः॥ अशेषनाशे वक्ष्यमाणः प्रतिनिधिः॥
सायंदोहे नष्टे प्रातर्दोहे विद्यमाने प्रातर्दोहं द्विधा विभज्य एकं भागमातच्य ताभ्यां यागं कुर्यात्॥ सा
यंदोहे विद्यमाने प्रातर्दोहे नष्टे ऐंद्रं माहेंद्रं वा एककपालं निरूप्य सांनाय्यवत्सदेवं यजेत्॥ उभ
यनाशे ऐंद्राग्नदेवतान् पंचशरावान् व्रीहीन्निरूप्य गार्हपत्ये श्रपयित्वा द्वयोः पात्रयोः कृत्वाग्निं प्र
थममिष्ट्वा इंद्रं यजेत्॥ अग्निर्मूर्धा भुवो यज्ञस्य॥ ऐंद्रस्य तं सिं प्रससाहिष इति याज्यानुवाक्ये॥ अथवा
ऐंद्रमैंदनं विधाय विभज्य चतुरवत्तमिंद्रायैव होतव्यमित्येके॥ अथ पाकाहुतावसादृश्येपि दंति
तरा सर्वपाने वासुदेवनोयवां चं कृत्वा तयैव पुनर्यागः॥ असर्वपाने शेषेणैव यागः सर्वप्रायश्चित्तं
च॥ यवाग्वाकरणेपि पुनर्याग इति केचित्॥ एतत्सर्वं प्रधाने निर्दिष्टं न भवति॥ तत्र स्विष्टकृदादिषु

तिपत्तिश्चाज्येन सर्वप्रायश्चित्तं ॥ एवमाज्यस्यान्यतो पहतौ जले प्रक्षिप्यान्यसंस्कृत्य प्रचारः ॥ अस्योपहतौ भ
स्मादिना प्रोक्षणं सर्वप्रायश्चित्तं च ॥ एवमन्वाहार्यस्यापि ॥ अग्निहोत्रोच्छेषणनाशे तंडुलैरन्नं च नं सर्वप्राय
श्चित्तं च ॥ इत्याश्वलायनस्य हविर्दोषप्रायश्चित्तं ॥ आपस्तंबानां ॥ यस्य हविष्युरुपुरोडाशादि दग्धं सर्वं चे
न्नदानस्य स्थाने आज्यं चतुरवत्तमवदाय इष्टान्यैर्दग्धैर्यागं समाप्य तेष्वेवाग्निषु नष्टं हविः कृत्वा य
जेत ॥ अन्वाधानादि सर्वं प्रयोगमावर्त्तयेत् ॥ असर्वदाहे सर्वप्रायश्चित्तमेव शेषेण यागः ॥ प्रतिपत्तिलो
पे दि पुनरिज्या ॥ अथ प्रधानयागात्पूर्वं हविः केशकीटादिना दुष्टमपहतं वा तदोपहतं हविरप्सु प्रक्षिप्य
सर्वप्रायश्चित्तं कृत्वा पुनस्तस्मिन्नेव प्रयोगे नष्टं वत्स्यं हविर्निर्वापप्रभृति संपाद्यान्यैः पुरुषैः सह यजेत् ॥ प्र
धाने निर्हते न पुनरुत्पत्तिः शेषमाज्येनैव कुर्यात् ॥ गृहीतमवदानं व्यापन्नं नष्टं वा पुनरायानमादव ३१

दाय यागः कर्त्तव्यः ॥ सर्वप्रायश्चित्तं च ॥ अवतंडुलादिषु आविष्करणात् प्रक्षालनेन शुद्धिः ॥ पाकादूर्ध्वं त्या
ग अन्यतो नोपहतौ ॥ अस्योपहतौ प्रोक्षणादिना शुद्धिः ॥ एवमाज्यसहितानां सर्वेषां नाशे पवित्रकरणाद्या
ज्यसंस्कारं तुषेषु यद्यं यजमानमनुमंत्रणं कृत्वा चतुरवत्तेन सर्वं यागं समाप्य पुनस्तेष्वग्निषु अन्यानि
हवींषि यथापूर्वं कुर्यात् ॥ अन्यस्त्सर्वनाशे यत्र स्कंनदेवो न्याय्ययागः ॥ व्यापन्नं जले प्रक्षिपेदुत्करे वा ॥ यदा पुरो
डाशाद्यपक्वं भवेत्तदा तामिष्टिं समाप्य दक्षिणाश्रीचतुःशरावमोदनं पक्त्वा चतुरो ब्राह्मणान् भोजये
त् ॥ तेष्वेको भार्गवः इति नियमः ॥ अयमपक्वदोषः सत्रोप्ये आज्येन नास्ति सर्वप्रायश्चित्तं ॥ इत्यापस्तं
बानां ॥ अथाश्वलायनानां ॥ यदा हविरपक्वं भवति तदानेनैव यागं समाप्य चतुःशरावमोदनं दक्षिणाश्री
श्रपयित्वा चतुरो ब्राह्मणान् भोजयेत् यजमानः ॥ हविष एकदेशे दग्धे न च्छेषेणेष्ट्वा सर्वप्रायश्चित्तं कृत्वा

नामेव देवतां पुनर्यजेत्॥ तस्मिन्प्रयोगे दक्षिणां दद्याद्यदद्यात्॥ नस्मर्त्विग्भ्यः॥ सर्वशोदग्धे
तं प्रयोगं समाप्य पुनरन्वाधानादि सर्वो यागः कार्यः॥ आवाहनकालात्पूर्वं हविर्दोषे तन्मध्ये वह्विषः
पुनरुत्पत्तिं कृत्वा यागसमाप्तिः॥ आवाहनादूर्ध्वं हविर्दोषे आज्येनैव हि समाप्य पुनर्यजेत्॥ प्रधान
द्रव्यातिरिक्तानां गौणानां नाशे आ कर्मसमाप्तेरुत्पत्तिं कृत्वा तेन तेनांगेन यजेत्॥ प्रधानद्रव्या
णां स्विष्टकृत्सर्वमेवोत्पत्तिः नोत्तरत्रेति नियमः॥ अवत्तस्य वदानादेर्नाशे पुनस्ततं एवावदा
य यजेत् सर्वनाशे प्रायश्चित्तं च॥ हविषो काकादिस्पर्शे पक्षवातेनवा इदं विष्णुरिति कृत्वा तद्धविरप्सु प्र
क्षिप्य पुनर्हविरुत्पत्त्यादिनो विधाय यजेत्॥ अथ सान्नाय्यप्रायश्चित्तमापस्तंबानां॥ यदि
सायं दोहार्थमपाकृता वत्सा निःशेषं पिबेयुः॥ तदा तत्स्थाने वायवे यवागूं निर्वपेत्॥ तस्याः ३२

प्रयोगः॥ सायंहोमोत्तरमुत्तरेण गार्हपत्यं स्फ्यमग्निहोत्रहवणीं शूर्पं पुरतः पात्रीं च प्रयुज्य पवित्रे कृत्वा सं
विशंतामित्यभिमंत्र्य पवानस्यत्वा मीत्यारभ्य वायवे त्वा जुष्टं निर्वपामीति निरूप्य निरुप्तं प्रोक्षणोपव
सति॥ प्रातः कर्मणेवामित्यादि पात्रप्रयोगे प्रातर्दोहपात्रे पुयवागूपाकार्थं पात्रं प्रयुनक्ति॥ निर्वापका
ले सायं निरुप्तेषु व्रीहिषु अग्नये निरूप्याग्नेर्हव्यं रक्षस्वेवायोर्हव्यं रक्षस्वेति स्थापनं॥ पुनः प्रागधिव
नात् कृत्वा यथाभागं विभज्याग्नेयभागं विष्णुहौ कपालान्युपधाय ध्रुवासीति यवागूस्थालीमुपधा
य प्रातर्दोहमंदोहयति॥ पिष्टान्युत्पूयतं डुलान्त्स्याग्नेयमधिश्रित्य धर्मोसीति तंडुलानोप्य द्वीभूतं
चरुं श्रपयति॥ तत्सामभिघार्योद्वास्य सान्नाय्यमंत्रेणाभिमर्शनं॥ आग्नेयेन प्रचर्य वायवे यवाग्वा
प्रचरति॥ ततः सान्नाय्यमंत्रेणानुमंत्रणं सान्नाय्यवत्॥ यदि दोहद्वयं पिबेयुस्तदा यवागूद्वयं विधा

यमहः प्रचरेत्॥ ततो वत्सापाकरणादि सर्वो दर्शे हिं कुर्यात्॥ यद्येव हविः पीतं तावत्मात्रमावर्तयेत् दित्ये
के॥ यदि निःशेषं न विद्युः स्तदा नानाज्ञानं वयेत् सर्वप्रायश्चित्तं कृत्वा शेषेण यागेन पुनरिज्येति॥ सायं
दोहनाशे रैंद्राग्नमेकादशकपालं निर्वपेत्॥ माहं इं माहं इयाजिनः॥ तस्यान्वाधायो तं हुत्वा प्रातरग्ने
येन सह प्रयोगः तूष्णीमभिधारणे याजमानं दधिधर्मेण प्रातर्दोहेन सह प्रचारः॥ अनुमंत्रणं सां
नाय्यवत्॥ प्रातःसायं दोहनाशेत्राते पिनयैव प्रयोगः॥ उभयपक्षे पि पुनरिज्या॥ एवं प्रातर्दोह
नाशे पि स एव पुरोडाशः पुनरिज्या च॥ सायं दोहे विनष्टे तद्दर्थं पुरोडाशो हुते प्रातर्दोहनाशे त
दर्थमप्यपरं पुरोडाशं हुत्वा पुरापत्सानाय्यवत्प्रचरेत्॥ युगपदुभयविनाशे रैंद्राग्नमैंद्रं वा पंच
शरावमोदनं निरूप्यायाग्नयइंद्राय च पृथक् प्रचारः॥ अनुमंत्रणं प्रकृतिवत्॥ ततः पुनरिज्या॥ आग्र ३३

यणानां स्कन्नप्रायश्चित्तं॥ स्कन्नं द्रव्यमभिमृशेत्॥ देवान् जनमगन् यज्ञस्तस्य माशीरवतु वर्धतांभू
तिर्घृतेन मुंचतु यज्ञो यज्ञपतिमंहसः॥ भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा यज्ञ
स्य त्वा प्रमयोन्मयाभिमया प्रतिमया ऽन्नस्य ब्रह्मस्कंदं प्रथमामनुद्यां रिमं च योनिमनु यश्च पूर्वः॥ स
मानं योनिमनुसंचरंतं द्रप्सं जुहोम्यनु सप्त होत्रा इत्यभिमर्शे सर्वप्रायश्चित्तं च॥ इदं चाहुति परिमिते द्रव्ये
न त्वन्यत्र। अन्यत्र तु सर्वप्रायश्चित्तमेव॥ आहुतिर्हूयमाना बहिः परिधि पतेत्तामाग्नीध्रः पूर्वोक्तमंत्रेणाभि
मृश्य तत्स्रीं जुहुयात्॥ ततो यजमान आग्नीध्राय पूर्णपात्रं दद्यात्॥ सर्वप्रायश्चित्तं च॥ आपस्तंबा
नोबहिःपरिध्याहुति स्कन्दने ध्वर्युराग्नीध्रमाह स्त्रोतो जुहुधीति॥ ततआग्नीध्रोंजलिना तामादाय स्वाहाका
रेण जुहोति तस्मै पूर्णपात्रं यजमानो दद्यात्॥ अथान्यत्र्यादि तंडुलादि निर्वापाद्ध्र्वमुत्पवनात् प्राकृय

दिस्कंदेत्तदा यत्किंचित्पशुजातीयं तन्नस्तंश्वाध्वर्यवे दद्यात्॥ अध्वर्युस्तत्प्रतिगृह्य भूपतये स्वाहा भु
वनपतये स्वाहा भूतानां पतये स्वाहा इत्यभिमंत्र्य सर्वप्रायश्चित्तं कुर्यात्॥ उत्पवनेऽहुते यदि स्कंदे
त्तदा चित्रं वस्तु दद्यात्॥ ततोऽभिमर्शनं सर्वप्रायश्चित्तं च॥ स्रुग्गतस्य प्राग्घोमात्स्कंदने पुष्कलं
देयं॥ सं त्वा सिंचामि यजुषा प्रजामायुर्धनं च॥ बृहस्पति प्रसूतो यजमान इह मा रिषत् इति सिंचे
त्सर्वप्रायश्चित्तं च॥ उद्वासनादूर्ध्वं स्रावस्य स्कंदने यत्किंचित्प्राणिजातं देयं॥ भूतपतय इत्यभिमं
त्रणं सर्वप्रायश्चित्तं च॥ अथ परिधिनिधानोत्तरं प्रयाजेभ्यः प्राक् बर्हिः परिधिदेशाद्यद्यंगारः पते
त्तदा ब्रह्मा तमंगारं स्रुवदंडेन निदध्यात्॥ मा तपो मा यज्ञस्तपन्मा यज्ञपतिस्तपत् नमस्ते अ
स्त्वायते नमो रुद्र परायते नमो यत्र निषीदसीति अध्वर्युं मा हिंसीः यजमानं मा हिंसीरिति पुरस्तात्॥ ब्र ३४

ह्माणं मा हिंसीः यजमानं मा हिंसीरिति दक्षिणतः॥ होतारं मा हिंसीर्यजमानं मा हिंसीः पत्नीं मा
हिंसीरिति पश्चात्॥ आग्नीध्रं मा हिंसीर्यजमानं मा हिंसीरित्युत्तरतः॥ इति यथादिशमभिमं
त्र्यैनमनुप्रहरेत्॥ आहं यज्ञं दधे निर्ऋतेरुपस्थात्तं देवेषु परिददामि विद्वान्॥ सुप्रजास्त्वं शत
हिमा मदंतं इह नो देवा मयि शर्म यच्छतेति॥ अथ प्रहृतमंगारं ब्रह्माभिजुहुयात्॥ सहस्रशृं
गो वृषभो जातवेदाः स्तोमपृष्ठो घृतवान् सुप्रतीकः॥ मा नो हिंसीद्धिंसितो नेत्वा जहामि गोपो
षं च नो वीरपोषं च यच्छ स्वाहेति ततः सर्वप्रायश्चित्तं॥ आपस्तंबानां॥ मा तपो मा० दसीति स्रु
वदंडेन निधीयते॥ आहं यज्ञं॥ ददामीति नमस्यौ प्रक्षिप्य॥ सहस्रशृं० यच्छ स्वाहेति होमः॥ अध्व
र्युयजमानौ पूर्वतः॥ ब्रह्मयजमानौ दक्षिणतः॥ होतृपत्न्यौ यजमानाव् पश्चात्॥ आग्नीध्रयज०

मानपश्चन्निलुप्तरतः॥अन्यत्समानं॥एतत्कालातिरिक्तेंगारस्कंदनेइदंतएकमितिसंवपेत्स
र्वप्रायश्चित्तं॥आपस्तंबानामपिसमानं॥अथदर्शपूर्णमासातिपत्तौशम्यापरासमतिक्रां
तौअन्यस्याग्निषुयागकृतौअस्याग्निषुअन्येनयागकृतौअस्याग्नीनन्योग्निर्व्यवेयाद्वा वि
च्छिन्नेर्वायोस्तरंअंतराश्वादिगमनेपाथिकृतीष्टिरेतेषुनिमित्तेषु॥एवंद्वयोर्दर्शनामप्यतिप
त्तौपाथिकृती॥अतिपन्नयागेनसमानतंत्रतावा॥गौणकालातिक्रमेपाथिकृतीष्टिमात्रंम
नयागाहुतिः॥आपस्तंबानांदर्शपूर्णमासंवातीयात्तदापाथिकृतंवैश्वानरीचकृत्वाऽतिपन्न
यागंकुर्यात्॥उभेवासमानतंत्रे॥पाथिकृत्पुरोवेनातिपन्नयागंकुर्यादितिकेचित्॥अन्यस्याग्नि
षुदर्शादिकरणेअस्याग्निषुअन्येनवायागकरणेअग्नावेक्ष्ववेहिंस्याग्निषुकृत्वापुनर्दर्शपूर्णमा ३५

सकरणं॥अंतराग्नीनामन्योग्निंनयेत्तथौताग्नीन्वालौकिकाग्नीन्वाअथवास्वाग्निभिःसहान्या
ग्नीन्व्यवेयाल्लौकिकान्वाव्यवेयात्तदाएषुनिमित्तेषुपाथिकृती॥अथकपालभेदनेप्रा॰॥
कपालंयदिभिद्येततदागायत्र्यात्वाशताक्षरयासंदधामीतिमंत्रेणसंधाय॥अभिन्नोघर्मो
जीरदानुर्यतआर्तस्तदगन्पुनः॥इध्मोवेदिःपरिधयश्चसर्वेयज्ञस्यायुरनुसंतरंतु॥त्रयस्त्रिं
शत्तंतवोयान्वितन्वतेइमंयज्ञंस्वधयायेयजंते॥तेभिश्छिद्रंअपिदध्मोयजत्रस्वाहायतोअप्ये
तुदेवानितिमंत्राभ्यांजलेप्रक्षिपेत्॥ततःसर्वप्रायश्चित्तं॥एवंश्वादिभिरवलीढानिअशुचि
द्रव्यस्पृष्टानिवाभिन्नइतिमंत्राभ्यांजलेप्रक्षिपेत्सर्वप्रायश्चित्तंच॥अन्यानिमृन्मयानिअशु
चिस्पृष्टानिभिन्नानिवाभूमिर्भूम्निमगान्मातामातरमप्यगात्॥भूयास्मपुत्रैःपशुभिर्योनो

३९ देहिम भिद्यतामिति जले प्रक्षिप्य सर्वप्रायश्चित्तं चेति सकृत्शाखिनां ॥ आपस्तंबानां ॥ उप
धानात्प्राक् यदि कपालं भिद्येत तदा गायत्र्या त्वेति संधानकरैर्द्रव्यैः संधायोपरि गार्हपत्ये
धारयित्वा तस्योपरि मनो ज्योतिरित्याज्येन कृत्वा ब्राह्मण्या भूमिर्भूमिमगादित्यभिमंत्रणे
कृते ऽभिन्नो घर्म इत्यप्सु प्रक्षिपेत् ॥ ततोऽन्यत्कपालमानीय सादनाभिमर्शन प्रोक्षणादि
कृत्वा त्रयस्त्रिंशत्तंतव इत्यनेन प्राक्प्रयुक्ते शुक्लेपः ॥ उपधानोत्तरं भेदने संधानादासुक्षे
पांतं कृत्वाऽन्यदाहृत्य तस्य स्थाने त्रयस्त्रिंशेतु पदध्यात् ॥ इति कपालभेदनप्रायश्चित्तं ॥
एवमन्यस्मिन्नपि भेदने भूमिर्भूमिमित्येतया ब्रह्माभिमंत्रयेत् ॥ एतयैवाध्वर्युर्जलेऽन्यस्यस
र्वप्रायश्चित्तं प्रयोगाद्बहिस्तत्कालीनजले प्रक्षेपः ॥ कपालनाशे उपधानादूर्ध्वं पुरोडाशाऽधिश्र ३९

यणात्सर्वं यदि कपालं नश्येत्तदाश्विनं द्विकपालं कुर्यात् पूर्णाहुतिं वा जुहुयादिति बहु
चब्राह्मणं ॥ अनुद्रासितेन हविःस्वकारमतेन वैश्वानरीयेष्टिः प्रयोगमध्ये पूर्णाहुतिर्वा ॥
प्रयोगसमाप्तौ सर्वप्रायश्चित्तं ॥ आपस्तंबानां ॥ आश्विनं द्विकपालं द्यावापृथिव्यमेककपा
लमिति समानतंत्रेष्टिः ॥ भार्गवो होता एकहायनो वत्सो दक्षिणा ॥ अत एव प्रकृतं कर्म स
माप्येष्टिं कुर्यात् ॥ इक्ष्वाकौ तं त्रमध्ये महीद्यौः पृथिवी च न इति स्रुवेणाहुतिं कृत्वान्य
कपालमुपधायेष्टिं समापयेत् ॥ पुरोडाशो दामनानंतरं भेदने नाशे वा सर्वप्रायश्चित्तं नेष्टिः ॥ अथ
पुरोडाशस्य भेदने पतने वा किमुत्यतत्रिति किमुस्रोष्टाः शं नः शं ते शिष्टागढि ॥ अघोरो यज्ञियो भूत्वा
सीद सदने तेरैस्वमा सीद सदनं स्वमिति तं बर्हिषि निधाय ॥ मा हिंसीर्देव प्रेरित आज्येन तेजसाज्य

यमानः किंचनरारिषः ॥ योगक्षेमस्य शोत्या अस्मिन्नासीद बर्हिषीत्यभिमंत्र्य माहिंसीरित्यभि
घार्यस्व आयतने निधाय सर्वप्रायश्चित्तं जुहुयात् ॥ आपस्तंबानां पुरोडाशो श्रेर्वापाद्या वा बर्हि
षि बर्हिर्गच्छेत्तदा बर्हिर्विसादयित्वा किंनुत्यतमीत्यृचाभिमंत्र्य माहिंसीरित्यृचाभिघार्य स्व आ
यतने निधाय सर्वप्रायश्चित्तं कुर्यात् ॥ अथ व्रत्येहनि शोकादिना अकरणे व्रतभंगे दिष्टिः ॥ आ
पस्तंबानाम विद्यमाने ॥ पत्न्या अपि एतस्मिन्निमित्ते सैवेष्टिः ॥ असकौ पर्णाकृतिर्वा ॥ दर्शे पिंड
पितृयज्ञस्य केनचिद्धेतुना लोपे यजमानीयेऽहनि पाणिप्रक्षालनात् प्राक् समिद्यजुषो वा प्राक् म
हाहविर्होतेति॰ पृथिव्यै इत्यनेन सप्तहोत्रा चतुर्गृहीतं जुहोत्याहवनीये वाचस्पतये ब्रह्मण इ
दं ॥ व्रतलोपे प्रायश्चित्तं ॥ यजमानस्य पत्न्याश्च व्रत्येहनि अन्नतवद्धने सीमातिक्रमे निषिद्धभक्ष ३७

णे स्त्रीसंगे बुद्धिपूर्वक रेतःस्कंदने व्रतपतीष्टिः ॥ उभयोरप्यसमानं ॥ अबुद्धिपूर्वस्कंदने सर्वप्रा
यश्चित्तं ॥ एतस्मिन्विषये त्रिरात्रमक्षारालवणाशिनौ ब्रह्मचारिणाविति स्मार्त्तमपि कर्तव्यं ॥ अ
विज्ञातव्रतलोपे प्रधानयागात्पूर्वं त्वमग्ने व्रत॰ छीद्रः स्वाहा ॥ अग्नये व्रतपतय इदं ॥ यद्वो वयं॰
प्रमिना॰ मः ॥ अग्निष्टद्विश्वमा॰ वाङ्गृह॰ यामि स्वाहा ॥ अग्नये व्रतपतय इदं ॥ इत्याभ्यामाहवनीये
स्रुवेण जुहुयात् ॥ जयेद्वा ॥ सर्वप्रायश्चित्तं ॥ अथ वैधानवीयेष्टिः ॥ अमावास्याप्रयोगे आरब्धे म
ति यदि पुरस्ताच्चंद्रमा अभ्युदियात् ॥ तदा एतामिष्टिं कुर्यात् ॥ अस्या अमावास्याविकारत्वात् प्रा
यश्चित्तेष्टिधर्मा उपांशुत्वहविर्धान्वताज्यभागादयो भवंति ॥ अमावास्यमेव तंत्रं ॥ अग्निर्दाता ॥ इं
द्रः प्रदाता ॥ विष्णुः शिपिविष्ट ॥ इति देवताविकारः ॥ शेषमाध्वर्यवान्नेयं ॥ अग्नेदाता॰ मता ॥ स

पंताविं॰ मघा। दीर्घसत्रे॰ अ॰ न्वते। भजन्तेहस्ता॰ हानवानु। वषट्कृतेवि॰ मदानः। प्रतत्रेअद्य॰ परा
कइतियाज्यानुवाक्याः। प्राकृतीसंयाज्ये॰। आपस्तंबानांविशेषः।। चतुर्दशींपंचदशीमिति
ज्ञात्वाअमावास्यार्थेऽग्न्यन्वाधानमग्नौभूतेनिरुप्तेहविष्यकालेप्रहत्रिशितिज्ञातेअकालेनि
रुप्तव्रीहीन्तंडुलीकृत्यमेक्षणंजननिनयनांतंकृत्वात्रेधातंडुलान्विभजेत्।। स्थूलाअणिष्ठामध्य
माश्चेति।। येमध्यमास्तेषामग्नयेदात्रेऽधिवपनादिकृत्वाऽष्टाकपालंकुर्यात्।। येस्थूलास्तेषामिं
द्रायप्रदात्रेसायंदोहदधनिचरुंकुर्यात्।। येऽणिष्ठास्तेषांविष्णवेशिपिविष्टायप्रातर्दोहपयसि
चरुधर्मेणचरुंश्रपयेत्।। दधिपयसोःकृत्यवनंतंडुलानुप्त्यपथमोसीत्यादिसर्वंचरुधर्मंकुर्यात्।।
चर्वोःकृष्णासनादूर्ध्वंदधिधर्माः पयोधर्माश्चकर्तव्याः।। याजमानंचसान्नाय्यवत्।। दधिचरोस्तूष्णी ३८

मभिधारणं।। दुग्धचरोर्यस्त्वआत्मेति।। अलंकरणंपुरोडाशस्यनचर्वोः।। यथाप्रकृतिआसा
दनं।। प्रचरणेपुरोडाशेनप्रचर्येंद्रायप्रदात्रेविष्णवेशिपिविष्टाय। दर्शवदनुमंत्रणं।। सान्ना
य्यवद्यजमानभागप्राशनं।। शेषंप्रकृतिवत्।। एवमिष्टिंसमाप्यतेष्वेवाग्निषुपुनरन्वाधानादिदर्शेष्टि
ंकुर्यात्।। अथवाव्रतचर्यांऔपवसथ्याभ्यामंवाकुर्यात्।। अथनिर्वापात्पूर्वंयद्यकालेप्रहत्रा
मितिज्ञातंतदाप्रकृतीभ्योनिर्वपणंकृत्वासंक्षालननिनयनांतेकृतेपूर्ववत्त्रेधातंडुलानित्याद्यभ्यु
दयेष्टिःकर्तव्या।। अथवानिर्वापप्रभृत्यग्निदानादिभ्यएवनिर्वापादिकृत्वाऽभ्युदयेष्टिःकर्तव्या
।। उभयपक्षेपिपुनरिज्या।। अस्मिन्नेवविषयेयस्याहहीनमितिसूत्रेणव्रतचर्यावाकर्तव्या।। त
दाकौत्रेधातंडुलानित्यादिअभ्युदयेष्टिंकृत्वापुनरन्वाधानाद्यविकृतंदर्शंकुर्यात्।। त

स्मादनिरुप्तैर्भ्युदितइत्यस्मिन्पक्षेपिप्रकृतीभ्योनिरुप्यापनीयप्रात्रादिभ्योनिरुप्यवा॥केव
लाभ्युदयेष्टिःव्रतचर्या॥पुनरिज्यासहिताभ्युदयेष्टिर्वेतिपक्षत्रयंभवति॥अनिरुप्तेऽका
लेरुक्तमितिज्ञातेप्राकृतीभ्यएवनिरुप्यप्रक्षालनानिनयनांतेवैधानंदुग्धानित्यादिप्रय
मकृत्यवत्॥यस्यहविर्निरुप्तमित्यस्मिन्निरुप्तेनिमित्तेप्रातर्दोहात्पूर्वंज्ञातेप्रातर्दोहार्थ
मुपाकृतान्वत्सान्मातृभिः संसृजेत्॥सायंदोहेभ्युदयेष्टिरेव॥दोहात्पूर्वंव्रतचर्येतिकेचि
त्॥व्रतचर्याचेच्छं॥पूर्वस्यांतिथावेवाकालेप्रहृत्तमितिज्ञातेयागोपकरणद्रव्यान्यन्यादि
नाग्नीश्वरस्रेत्॥सायंदोहार्थमपाकृतान्वत्सान्मातृभिः संसृजेत्॥सायंहोमेनयवाग्वनि
यमः॥ब्रह्मचर्यादिकुर्यात्॥श्वोभूतेवत्सापाकरणादिकृत्वाइर्वेद्युः कृतशेषमौपवसथ्यंकृ ३८

त्वायवाग्वासायंहोमादिसर्वांदर्शक्रियांकुर्यात्॥सायंदोहेदुग्धेव्रतचर्यापक्षेनदधिआतं
चनार्थंनिधायप्रातर्दोहार्थमपाकृतान्मातृभिः संसृज्यश्वोभूतेसायंदोहार्थंवत्सानपा
कृत्यपूर्वेद्युः कृतशेषमौपवसथ्यंकृत्वायवाग्वहोमादि॥सायंदोहेदुग्धेपूर्वेद्युर्दुग्धेनद
ध्यातंचनंकृत्वाश्वोभूतेदर्शयागंकुर्यात्॥प्रातर्दोहेदुग्धेपुरोडाशेचकृतेऽकालइतिज्ञाते
व्रतचर्यैवनाभ्युदयेष्टिः॥पुरोडाशमाज्येनिदध्यात्॥प्रातर्दोहमग्निसंयोगेनरक्षेत्॥सायं
दोहार्थंवत्सानपाकृत्यसायंदुग्धंपूर्वदध्यातंच्यश्वोभूतेयागंकुर्यात्तैरेवद्रव्यैः॥यागो
त्तरंज्ञातेसर्वप्रायश्चित्तंकृत्वापुनर्यागंयथाप्रकृतिवत्कुर्यात्॥असान्नाय्ययाजिनोभ्युद
येष्टौदधिपयसोरभावाज्जलेचर्वोः श्रपणं॥शेषंपूर्ववत्॥एवंपूर्णमासेनाभ्युदयेष्टिः॥न

व्रतचर्या॥ तूष्णीमग्नीन्संभृत्य सर्वप्रायश्चित्तं कृत्वा काले यागः॥ इत्यभ्युदयेष्टिप्रायश्चि
त्तं॥ अथ दर्शपूर्णमासादिषु विपर्यासप्रायश्चित्तं॥ देवताविपर्यासः आवाहनादिषूत्
क्रमः॥ अनुवाक्यासु अन्यदीयामन्यस्मा अनुब्रूयात्॥ एवं याज्यासु॥ आज्यविपर्यासो जो
हवौपभृतयोरित्यादि॥ अवदानविपर्यासो मध्यात्पूर्वार्धादित्यादि॥ हविर्विपर्यासो नि
र्वपणादिषूत्क्रमः॥ यागे चान्यदीयेनान्यस्मै यागः॥ एषु निमित्तेषु यद्वो देवा अतिपात
यानि वाचा च प्रयुती देवहेलनं॥ अरायो अस्माँ अभिदुच्छुनायते न्यत्रास्मिन्मरुतस्तन्नि
धेतन स्वाहेति ब्रह्मा स्रुवेणाहवनीये जुहुयात्॥ ततो यजमानो गृहे यन्मुख्यं धनं तद्ब्रह्म
ये दद्यात्॥ एकस्याद्यवदान वैकल्ये त्वं नो अग्ने॥ स त्वं नो अग्ने॥ व्याहृतिभिश्च हुत्वा पुन

स्तस्माद्देवहविषोऽवदाय यजेदिति प्रायश्चित्तचंद्रिकायां॥ याज्यानुवाक्ययोर्यागात्प्रागेव भ्रं
शे ज्ञाते प्रायश्चित्तं कृत्वा विहितामनुब्रूयात्॥ यागे संजाते उक्तप्रायश्चित्तं सर्वप्रायश्चि
त्तं च कृत्वा शेषं समापयेत्॥ यागाभ्यासः॥ याज्यायामभिविप्लुते देवताध्याने चेत् न यागा
वृत्तिः॥ अतोऽन्यथा चेत्तदा यागावृत्तिः॥ अग्नीषोमीयेणाग्नेययागे कृते उक्तप्रायश्चित्तं कृत्वा
ग्रे येनाग्नीषोमीयः यागः कर्तव्यः॥ सर्वप्रायश्चित्तं च॥ उभययागे हुते प्रायश्चित्तमेव नावृ
त्तिः॥ आपस्तंबानां तु एतेषु निमित्तेषु तंत्रसमाप्तेः प्राक्ज्ञाते सर्वप्रायश्चित्तं कृत्वा पुर
कृतं दत्वा तस्माद्देवहविषः पुनर्यागः॥ समाप्ते तंत्रे पुनर्यागमित्याहुः॥ अंगदेवतासु पु
कलदाने सर्वप्रायश्चित्तं च कृत्वा पुनर्यागः॥ समाप्ते तंत्रे प्रायश्चित्तं नावृत्तिर्यागस्य॥ अ

भा॰प्रा॰
४१

यद्यग्न्यादिदेवतावाहनमकृत्वोत्तरंकर्मकुर्यात् ॥ तदा यथैव स्मरंति तत्रैव तां मंद्रस्वरेण वा
होत्तरंकर्मकुर्यात् भूरिति ब्रह्मा गार्हपत्ये जुहुयात् ॥ मनसैवावाहयेदिति केचित् ॥ यद्यस्त्वा
निनीमावाहयेत् तामप्याज्येन यजेत् ॥ निगमने तु निगमयेच्च ॥ सर्वप्रायश्चित्तं च ॥ आपत्नीं वा॰
नो याग्यात्पूर्वमनावाहने ज्ञाने सर्वप्रायश्चित्तं कृत्वा मनसावाहनं कुर्यात् ॥ याज्योर्ध्वं ज्ञाते यद्वो दे
वा इत्याहुतिः ॥ एवमभागिनीषु चार्यानिर्वापे तत्संस्रष्टं द्रव्यं उत्करे त्यक्त्वा पुनर्भागिन्यै निर्वपे॰
सर्वप्रायश्चित्तं च ॥ एवं द्रव्यव्यत्यासे तत्तद्द्रव्यं परित्यज्य निर्वापादि पुनर्यागः ॥ एवं निर्वापविस्मृ
तौ अंतरितप्रायश्चित्तं सर्वप्रायश्चित्तं कृत्वा ॥ पुनर्निर्वापं कुर्यात् ॥ अनिरुप्तेन यागे कृते यद्वो देवा
इत्याहुतिः ॥ एवं प्रोक्षणादिमंत्रेषु देवताविपर्यासे सर्वप्रायश्चित्तं ॥ हविःशेषोद्वासनमकृत्वाऽन्य ४१

याज्यार्थं यदा ग्रावणं करोति तदा यद्वो देवा इत्याहुतिं जुहुयात् ॥ यदि प्रणीता आपो भूमौ
निःशेषं पतेयुः शेषं वा गच्छेयुः तदा संवापात् पूर्वं चेत्तदा आपो हि ष्ठा मयोभुव इति तिसृ
भिः पुनर्गृहीत्वा ततं म आ॰ अयङ् समुद्र उत नभो यजः स्वाहा भुवः पुनर्भुवः स्वाहा ॥ रूभु॰
भ्य इदं ॥ कृत्वा वशेषेन प्रायश्चित्तं शिष्टेनैव संवापं कृत्वा सर्वप्रायश्चित्तं कुर्यात् ॥ संवपनादूर्ध्वं
सर्वप्रायश्चित्तमेव ॥ दर्शपूर्णमासादौ हविःप्रोक्षणं कुर्वन् यद्याग्निमभिप्रोक्षेत्तदा पुनस्त्वादित्या
रुद्रा॰ सैः ॥ एतेनत्वं तन्त्वं॰ कामा इत्युदकोपहतमग्निमुपसमिध्याहवनीये सर्वप्रायश्चित्तं जुहु
यात् ॥ एवं परिषेचनादिष्वपि द्रष्टव्यं ॥ आधानानंतरं केनचिद्धेतुना दर्शपूर्णमासौ नारब्धौ पत्नी
वा रजस्वला तदा आगामिन्यां पौर्णमास्यां सारस्वतहोमं अन्वारंभणीयां च कृत्वा विभ्रहोलिं कुर्या

भा॰प्रा॰
४२

त्॥ततोदर्शपूर्णमासार्थंसारस्वतहोममन्वारंभणीयांचविधायचतुर्होतारंकृत्वापौर्णमा
सेनयजेत्॥प्रथमदर्शेप्रतिपन्नेआगामिदर्शेविभ्रष्टेहिंकृत्वादर्शेनयजेत्॥एवमाधानव
सरेपशुबंधाकरणेप्रथमाग्रयणाकरणेचविभ्रष्टेष्टिः॥इदमाश्वलायनमतेविसमानो॥अ
पदर्शपूर्णमासयोरन्वाधानदिनेयदिपत्नीरजस्वलानदातामपरुध्ययागंकुर्यात्॥तत्रयो
क्तंवेदेःपश्चादुदग्ग्रंस्थापयेत्॥शेषेपत्नीमंनरेतिलुप्यते॥तेजोसीत्यधिश्रयणंतेजस्सेत्वे
तुपादानंचलुप्यते॥पत्नीसंबंधमुपस्थानादिहोत्रकर्मचपूर्णपात्रसंबंधिलुप्यते॥संपत्नी
होमश्चविधेयः॥एवमिष्टिंसमापयेत्॥ततस्तुगमनेअमूहमस्मिसुवीर्यायेतिआक्रान्तं॥त
तोविष्णुर्योनिमित्यादित्रयोदशाभिरभिमंत्र्यद्दिंहल्यतामुपेयात्॥बहुपत्नीकस्यपत्नीकर्मण्य ४२

न्याभिःकुर्यात्॥एवंप्रसूतायांसूतकोनएवेष्टिः॥एवंविकृतिषु॥अन्वाधानादूर्ध्वंनामयपरु
ध्येवयागः॥ततःप्रागतारंभःप्रोषितेयजमानेव्रत्येहतित्रक्तुमतीचेत्तदापंचमेहनियागो
बौधायनमतेन॥अथदर्शपूर्णमासादिषुपवित्रकरणादूर्ध्वंप्रस्तरेप्रतिपत्तिपर्यंतंयदिमध्ये
पवित्रंनश्येत्तदाग्नयेपवित्रवतेइष्टिः॥पूर्णाकृतिर्वाप्रायश्चित्तं॥दर्शपूर्णमासयोरन्वाधाना
नंतरंप्रधानयागात्पूर्वंयदिग्रहणंस्यात्॥तदाउदुत्यंजातवेदसं॰चित्रंदेवानामितिद्वाभ्यांसू
र्यग्रहे॰नवोनवोभवतिजायमानोह्नांकेतुरुषसामेत्यग्रं॥भागंदेवेभ्योविदधात्यायन्प्रचंद्रमा
स्तिरतेदीर्घमायुःस्वाहा॥चंद्रमसइदं॰यमादित्याअंशुमाप्याययंतियमक्षितमक्षितयःपिबं
ति॥तेननोराजावरुणोबृहस्पतिराप्याययंतुभुवनस्यगोपाःस्वाहा॥चंद्रमसइदं॥चंद्रग्रहेप

धानमागात्पूर्वं जुहुयात्॥ एवं द्वादशाहसाध्यायां विकृतावपि॥ इष्टिमध्ये भये समुपस्थिते यतइं
द्र भ॰ तयेवि॰ हिं स्वाहा इंद्रायेदं॰ स्वस्तिदा विशः॰ वृषेंद्रः॰ स्वस्तिदा अभयंकर स्वाहा॥ इंद्रायेदं॥ इ
ति द्वाभ्यां हुत्वा कर्मसमापयेत्॥ कर्तुर्मशकं चेत्समारोप्य कालांतरे विभ्रेष प्रायश्चित्तं हुत्वा पथि
कृत्सुखेनेष्टिं कुर्यात्॥ तुक्कादीनां दारुमयानां काकाद्युपहतौ तत्क्षणमुद्धृतोदकेन क्षालनमित्या
दि स्मार्त्तं प्रायश्चित्तं॥ अमेध्यादिभिरत्यंतोपहतौ त्यागः॥ एवं मृन्मयादीनामपि॥ यदि प्रमादा
दग्नीन् रजस्वलास्पृशेत्तदा पुनराधानं कृत्वा भयेसु च यइष्टिः कार्या॥ प्रथमपिंडपितृयज्ञारंभे
यदि रजस्वलात दा दर्शांतरे सप्रहोतारं कृत्वा पिंडपितृयज्ञारंभः॥ द्वितीयादौ न प्रतिबंधः॥
अथ दर्शपूर्णमासयोरेकाध्वर्यव प्रायश्चित्तं बौधायनोक्तं॥ तत्रादावध्वर्युर्वेदिकरयोर्मध्य ४३

तः प्रविश्य इडा देवहूरिति चतुः कृत्वो जपित्वा चतुर्णां कर्माणि क्रमेण कुर्यात्॥ होतरे
हीत्यंते हौत्रार्थं तीर्थेन पुनः प्रविश्यांतर्वेद्यासीनः अग्नये समिध्यमानायानुब्रूहीत्युक्त्वा न
मः प्रवक्त्रे इत्यादि सामिधेनीः पठन्॥ समिध आधायांते वेदेनोपवीज्याग्ने महाँ असीति
ति हुत्वा प्रवरं वदेत्॥ ततउपविश्य॥ ततः स्रुवाघारं कृत्वा मनोसीति याजमानमुक्त्वा देवे
द्धइत्यादि यजमानजैत्यंते ति हुत्वा वदेत्॥ उपविश्यादितिर्मानेत्यादि ते हस्मीत्यंते हुत्वा प्रैष
पूर्वकमग्निं संमृज्य भुवनमसीत्यादि स्रुचाघारं हुत्वा वागस्येति याजमानमुक्त्वोपविश्याश्रा
व्येति हुत्वा प्रत्याश्राव्यास्तो मानुषइति चनामगृहीत्वोपविश्याश्रावययजेत्यादि होता
हं मानुषइत्यंतमुक्त्वोदायुषेत्युक्त्वायमुर्वं सम्मृज्य होतृषदनाभिमंत्रणं विधायैकाध्वर्यव

प्रायश्चित्तं स्रुवेणाहवनीये जुहुयात्॥ जुष्टो वाचो भूयासं जुष्टो वाचस्पतये देवि वाक् यद्वाचो
मधुमत्तमं तस्मिन्माधाः स्वाहा सरस्वत्यै स्वाहा सरस्वत्या इदं इममेवाश्विनायज्ञस्य यद्वाचो यदु
रिक्तं तदश्विनौ भेषजेन धत्तां स्वाहा॥ अश्विभ्यामिदं॥ त्रातारमिं॰ कुर्वंतु रा॰ डः स्वाहा॥
इंद्रायेदं॥ यन्मे मनसश्छिद्रं यद्वाचो यच्च मे हृदः॥ देवास्तच्छमयंतु सर्वे सोमो बृहस्पतिः स्वाहा
॥ देवेभ्यः सोमाय बृहस्पतय इदं॥ यद्विद्वांसो यदविद्वांसो मुग्धाः कुर्वंत्यृत्विजः॥ अग्निर्मा
तस्मादेनसो गार्हपत्यः प्रमुंचतु दुरिता यानि चकृम करोतु मामनेनसं स्वाहा अग्नये गार्हप
त्यायेदं॥ ब्रह्मत्वे होत्र आध्वर्यव आग्नीध्रे चैकैकयज्ञे कर्मणि तन्मे देवा रक्षंतां शमयान्मे मा॰
हिंसिषुः स्वाहा॥ देवेभ्य इदं॥ अहं ब्रह्माहं होताहमध्वर्युरहमाग्नीध्रोहं यजमानः एकएव ४४

यादेवानो यज्ञमृतुथा नयंतु इति मंत्रेणाध्वर्युर्यथास्थानं कल्पयति॥ ततो यजमानोभिमंत्रये
त्॥ प्रतिक्षत्रे प्रतितिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु॥ प्रति प्रजायां प्रतितिष्ठामि भव्ये
॥ विश्वमन्याभिवावृधे तदन्यस्यामधिश्रितं॥ दिवे च विश्वकर्मणे पृथिव्यै चाकरं नम इति॥ ततो
ऽध्वर्युः॥ अस्कान्द्यौः पृथिवी॰ अस्कानजनि प्राजनीति॰ द्वाभ्यामाहवनीये जुहुयात्॥ द्यावापृ
थिवी देवते॥ अथ चातुर्मास्यादिषु आमिक्षायामेकदोहनाशे तं पुनरुत्पाद्य यागः॥ उभयदोह
नाशे तं पुनरुत्पाद्य यागः॥ उभयदोहनाशे आज्येन यागः॥ वाजिने प्याज्यमेव प्रतिनिधिः सर्व
प्रायश्चित्तं च॥ समाम्नाय प्रायश्चित्तं॥ यदि इष्टिमध्ये यजमानमरणं स्यात्॥ तदा सर्वेभ्यो हवि
र्भ्यो द्विर्द्विरवदाय देवतामुच्चार्य स्वाहाकारेण जुहुयात्॥ अनिरुक्तेष्टिविधिप्रयोगस्याग एव॥ नि ४५

वयज्ञेमत्यर्याणितन्मेदेवारक्षंतां प्राणान्मेमादिदृक्षितिभुः स्वाहा॥ देवेभ्यइदं॥ इत्यष्टौकृत्वा
घृतवतीमितिस्रुचावादायाहवनीयपश्चादुपविश्यसर्वादेवतायजति॥ स्विष्टकृदंतेश
शिष्टमवदायेज्यसावदायक्रमेणमंत्रान्जप्त्वाभक्षयेत्॥ तथैवचतुर्धाकरणमविप्राश्य
न्वाहार्यंपृथक्गृहीत्वाऽन्वयाजादिकुर्यात्॥ यजमानेकर्तरिनान्वाहार्यः॥ शेषंप्रकृतिवत्स
मापयेत्॥ इत्येकाध्वर्यवप्रायश्चित्तं॥ होतुर्भिन्नत्वेनैतत्प्रायश्चित्तं॥ यजमानस्यव्रत्येहनि
मायमन्स्वरमक्रूपरान्नकोपाहंकारभयविषादकार्पण्यलोभादीनांचकरणेस्मार्तंप्रायश्चि
त्तमितिदेवयाज्ञिकः॥ यद्याग्रयणचातुर्मास्यादिषुएककपालःस्कंदेतकुतःपर्यावर्तेतवात
दा॥ प्रजापतेर्वर्तनिमनुवर्तस्वानुवीरैरनुराध्यामगोभिरन्वश्वैरनुसर्वपुष्टैरनुप्रजान्विंद्रिये॥

र्वोपोत्तरंहविष्यपक्केतस्मिंहविःपाकंकृत्वापूर्ववत्स्वाहाकारेणकृत्वाप्रयोगशेषंपरिसमाप्ये
त्॥ एवमग्निहोत्रदर्शपूर्णमासपशुचातुर्मास्यसोमादिषुस्वशाखास्वनुक्तेप्रायश्चित्तेस्वशा
खोक्तान्याकैर्वापरशाखोक्तंप्रायश्चित्तंविधायनित्यकर्मसमापयेत्॥ अनुक्तप्रायश्चित्तेसर
र्वप्रायश्चित्तंविष्णुस्मरणंचेतिसंक्षेपः॥ ॥इतिदर्शपूर्णमासप्रकरणेसमाप्तं॥ ॥श्री॥

ཀ་ཕྲ་
༥༦